CC-0. Digitized by eGangotri and MIDF- Delhi

'मास्टर' मणिमालाया अष्टषष्टिसंख्यको मणिः (सा० वि० ३)

उत्कीर्णलेखाञ्जलिः

अर्थात्

वाराणसेयगवर्नमेण्टसंस्कृतकालेज-

साहित्यशास्त्रिपरीक्षायां पाठ्य-

स्योत्कीर्णलेख-पञ्चकस्य

संग्रहः ।

सम्पादकः—

श्रीजयचन्द्रविद्यालङ्कारः

प्रकाशकः—

मास्टर खेलाड़ीलाल ऐण्ड सन्स

संस्कृत बुकडिपो,

कचौड़ीगली, बनारस सिटी ।

मूल्यम् ॥=)

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

nath Bhattarai Collection. Nagarjun-7, Kathmandu,

CC-0. Digitized by eGangotri and MIDF- Delhi

'मास्टर' मणिमालाया अष्टषष्टिसंख्यको मणिः (साहित्यविभागे ३)

उत्कीर्णलेखाञ्जलिः ।

अर्थात्

वाराणसेयगवर्न्मेण्टसंस्कृतकालेजसाहित्य-
शास्त्रिपरीक्षायां पाठ्यस्योत्कीर्ण-
लेखपञ्चकस्य संग्रहः ।

श्रीजयचन्द्रविद्यालङ्कारेण

ऐतिहासिकोपक्रमणिकाभिष्टिप्पणीभिर्भाषानुवादेन च
समलङ्कृत्य सम्पादितः ।

काशीस्थ-'संस्कृत-बुकडिपो'-इत्यस्याध्यक्षैः
मास्टर खेलाड़ीलाल ऐण्ड सन्स महोदयैः
'मास्टर प्रिण्टिङ्ग वर्क्स' नाम्नि मुद्रणागारे
मुद्रापयित्वा प्रकाशितः ।

द्वितीयं संस्करणम्] १९९९ वि० [मूल्यम् ॥=)

श्रीरामेश्वर शर्मा
श्रीरामेश्वरस्मृति
११२०
gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

मुद्रकः—
श्रीमन्नालाल अभिमन्यु एम० ए०,
मास्टर प्रिण्टिङ्ग वर्क्स,
बुलानाला,
बनारस सिटी

nath Bhattarai Collection. Nagarjun-7, Kathmandu,

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीरामेश्वर शर्मा
शास्त्री 2 वर्ष

समर्पणम्

अस्मद्गुरुपादेभ्यो
न्यायसांख्यवेदान्ततीर्थ-महामहोपाध्याय-
श्रीमत्पण्डित-योगेन्द्रनाथभट्टाचार्य-
महोदयेभ्यः ।

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

nath Bhattarai Collection. Nagarjun-7, Kathmandu,

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रस्तावना

गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् ॥

(विष्णुपुराणे २।३।१)

अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।

(श्रीमद्भागवते ५।६।१३)

इत्यादिप्रकारैः प्राचीनसमये स्वयशोडिण्डिमेन पूरितदिगन्तरालस्य सभ्यतासमुत्कर्षं चावास्मवतोऽस्मद्भारतवर्षस्य आधुनिकी अवनतिः कस्य सहृदयस्य मनो न कदर्थयति ? तस्यैवावनतिगर्त्ते पतितस्य पूर्वं कीदृशं महत्वमुत्कर्षश्चासीदिति प्राचीनेतिहासविमर्शेनैवावगन्तुं शक्यते । स्वदेशस्य पुरातनीं महत्तामवगमयितुमेवास्मच्छास्त्रेषु इतिहासपुराणयोरध्ययनमत्यावश्यकत्वेन यत्र तत्रोद्घोष्यते । तथा चोद्धृतं राजशेखरेण काव्यमीमांसायाम्—

इतिहासपुराणाभ्यां चक्षुर्भ्यामिव सत्कविः ।
विवेकाञ्जनशुद्धाभ्यां सूक्ष्ममप्यर्थमीक्षते ॥

परन्तु कालप्रभावाद्वाऽस्मद्दौर्भाग्येण वा अस्माकं देशस्य क्रमबद्धः प्राचीनेतिहासो विलुप्तप्राय एव । तस्यैवैष प्रभावो यत्स्वयशोभिश्चमत्कृतलोकानां स्वदेशगौरवास्पदीभूतानामपि चन्द्रगुप्ताशोकसमुद्रगुप्तप्रभृतिसम्राजामितिहासं न जानीमो वयम् । वर्त्तमानावस्थाप्रभावप्रभा-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

विताश्च नानुभवामो यत्कीदृशो महानुत्कर्षो विशालो विस्तारश्चासीत्तस्मिन्समयेऽस्मद्देशस्य । अतः कोऽत्र विप्रतिपत्स्यते स्वदेशेतिहासस्योपयोगिताविषये ?

नानाकारणैर्विलुप्तप्रायस्य च तस्येतिहासस्य परिज्ञानार्थमत्युपयोगिसाधनेषु तत्तत्कालिकराजमहाराजैः शिलादिषु समुत्कीर्णाः प्राचीनलेखा अपि अन्यतमं साधनम् । एते हि लेखाः संस्कृतादिभाषासु तत्तत्कालिकविभिन्नलिपिषु च लिखिता भारतवर्षस्य विभिन्नप्रदेशेषु समये समये समुपलब्धाः समुपलभ्यन्ते च । प्राचीनलिपिनिष्णातैरितिहासपण्डितैश्च सपरिश्रमं विवेचनापुरःसरं सम्पाद्य प्रकाशिताः प्रकाश्यन्ते च । प्रधानतया एतादृशलेखसाक्ष्यसाहाय्येनैव भारतीयेतिहासस्य बहवो विलुप्तांशाः पुनरपि सनिश्चयं प्रकटीकृताः सन्ति । प्रसङ्गत एव एते उत्कीर्णलेखाः स्वकीयसरसकान्तपदावल्या रचनासौष्ठवेन च सहृदयानां चेतांसि आह्लादयन्तः प्राचीनकालादेवास्मद्देशीयसाहित्योन्नतिं च प्रख्यापयन्ति । किञ्च पाठकानां प्रशस्तिलेखनकलायाः परिचयस्य प्रदानेनापि एषामतीवोपयोगित्वम् ।

महानेष प्रमोदविषयो यद्राजकीयवाराणसेयसंस्कृतपरीक्षासञ्चालकैरुक्तविषयस्योपयोगित्वमाकलय्यैव पञ्चानामुत्कीर्णलेखानां सन्निवेशः साहित्यशास्त्रिपरीक्षायां कृतः । सर्वथा ते तदर्थमस्माकं धन्यवादार्हाः । त एव लेखा अपेक्षितेतिहासपदार्थविस्पष्टीकरणपुरःसरं संक्षिप्तविषमस्थलटिप्पण्या सहात्र प्रकाश्यन्ते । आशास्यते यन्नूनमेषामध्ययनेन परीक्षार्थिनां न केवलमितिहासज्ञानप्रवृत्तेरुत्साह एव किन्तु–'आम्राश्च सिक्ताः पितरश्च प्रीणिता' इति न्यायेन साहित्यरसास्वादेन समं प्रशस्तिलेखनरीतिपरिज्ञानं च भविष्यतीति ।

विदुषामाश्रवः—
श्रीजयचन्द्रो विद्यालङ्कारः ।

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

लेख-सूची

पृ०

(१) गिरिनगरे रुद्रदाम्नो लेखः १

(२) महरौली-लोहस्तम्भोत्कीर्णो महाराजचन्द्रस्य लेखः १५

(३) दशपुर-पट्टवायश्रेण्याः शिलालेखः सं० ५२९ २०

(४) दशपुरे यशोधर्म्मराजकालिकः कूपशिलालेखः
सं० ५८९ ... ३९

(५) विग्रहराजस्य दिल्लीस्तम्भलेखः सं० १२२० ५६

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

यस्योद्वर्त्तयतः प्रतीपमुरसा शत्रून्समेत्यागतान्
वङ्गेष्वाहववर्त्तिनोऽभिलिखिता खड्गेन कीर्त्तिर्भुजे[1]।
तीर्त्वा सप्त मुखानि[2] येन समरे सिन्धोर्ज्जिता वाह्लिका[3]
यस्याद्याप्यधिवास्यते जलनिधिर्वीर्य्यानिलैर्दक्षिणः[4] ॥१॥

१. वङ्गेषु वङ्गप्रदेशेषु समेत्य सङ्गत्य आगतान् प्राप्तान् आहववर्त्तिनो युद्धप्रवृत्तान् शत्रून् रिपून् उरसा वक्षःस्थलेन प्रतीपं पराङ्मुखं यथा स्यात्तथा उद्वर्त्तयतः उन्मूल्य विद्रावयतः परावर्त्तयतो वा यस्य भुजे बाहौ खड्गेन असिना कीर्त्तिः ख्यातिः अभिलिखिता उत्कीर्णा। यस्य भुजे शत्रुखड्गप्रहारजनिता व्रणाः कीर्त्तिलेखा इव भान्तीत्याशयः।

२. सिन्धोः सप्त मुखानि शतद्रुविपाशेरावतीचन्द्रभागावितस्ता-सिन्धुकुभा इति सप्त नद्यः। सिन्धुसहितानां तासां सप्तत्वम्। ता नद्यः सिन्धोर्मुखसदृश्यस्तद्द्वारैव सिन्धुर्जलमाददातीति हेतोः।

३. वाह्लीकदेशो वंक्षूपकण्ठावस्थितोऽद्यत्वे बलख इति प्रसिद्धः प्रदेशः। वाह्लिक इति ह्रस्वत्वं तु छन्दोवशात्।

४. वीर्यानिलैः पराक्रमरूपपवनैः, दक्षिणः जलनिधिः समुद्रः अधि-वास्यते सुरभीक्रियते। दक्षिणजलनिधिस्तु कुमारीतीर्थस्य सिंहलद्वीपस्य च दक्षिणतो यो ह्यद्यत्वे भारतीयमहासागर इत्युच्यते। यौ त्वद्यत्वे

वङ्गदेश (पूरबी बंगाल) में मिल कर आये हुए शत्रुओं को युद्ध में छाती के बल पीछे ठेलते हुए खड्ग से जिसकी भुजा पर कीर्ति लिखी गई, सिन्ध के सातों मुखों (धाराओं) को तैर कर जिसने बलख देश को युद्ध में जीता, जिसके पराक्रम की वायु से दक्षिण समुद्र आज भी सुवासित हो रहा है, जो नरपति मानो (पृथ्वी का भार वहन करते-करते) थक कर इस भूमि को छोड़ दूसरी भूमि (स्वर्ग) पर पहुँच गया है, जो अपनी मूर्त्ति

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

खिन्नस्येव विसृज्य गां नरपतेर्गामाश्रितस्येतरां[५]
मूर्त्या कर्मजितावनीं गतवतः कीर्त्या स्थितस्य क्षितौ[६]।
शान्तस्येव महावने हुतभुजो यस्य प्रतापो महा-
न्नाद्याप्युत्सृजति प्रणाशितरिपोर्य्यत्नस्य शेषः क्षितिम्[७] ॥२॥

आङ्गलपद्धत्यनुसारिभिर्वङ्गोपसागराऽरब्यसागरावुच्येते, तावत्सत्पूर्वजाः प्राक्प्रत्यक्पयोधी इत्यूचुः। वङ्गदेशो हि भारतस्य पूर्वसीम्नि, वाह्लीकदेशो वायव्यसीमायां, दक्षिणजलनिधिश्च दक्षिणान्ते। वङ्गवाह्लीकदक्षिणजलनिधिमध्यपाति सकलभारतम्। एतेन राज्ञः सकलभारतैकाधिराज्यमुक्तम्।

५. खिन्नस्येव अतिचिरं भूभारवहनाद्धेतोः परिश्रान्तस्येव अत एव गाम् इमां पृथिवीं विसृज्य विहाय इतरां गां दिवमित्यर्थः, आश्रितस्य उपगतस्य।

(लेखोऽयं चन्द्रगुप्तस्य मृत्योरनन्तरमुत्कीर्ण इत्यप्यनेन सूच्यते।)

६. मूर्त्या देहेन कर्मभिः साधुकर्मभिर्जिता अवनी स्वर्गलोकस्ताम् गतवतः प्राप्तस्य।

७. महावने महत्यरण्ये शान्तस्य निर्वाणस्य हुतभुजः वह्नेरिव प्रणाशितरिपोः निहतशत्रोः यस्य राज्ञो यत्नस्य शेषः स्मारकभूत इत्यर्थः प्रतापोऽद्यापि क्षितिं महीं न उत्सृजति त्यजति। अधुनाऽपि यस्य प्रतापो भुवि वर्त्तत इत्यभिप्रायः।

(लिंग शरीर) से अपने कर्म (सुकृत) द्वारा जीती हुई भूमि (स्वर्ग) को पहुँच गया है तो भी कीर्ति से इस भूमि पर स्थित है, महावन में (वन को जलाकर) शान्त हुई अग्नि की तरह शत्रुओं के नाशक, जिसके यत्नों का शेष भाग (रूप) महान् प्रताप अब भी पृथ्वी को नहीं छोड़ता, जिसने

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राप्तेन स्वभुजार्जितं च सुचिरं चैकाधिराज्यं क्षितौ
चन्द्राह्वेन समग्रचन्द्रसदृशीं वक्त्रश्रियं बिभ्रता ।
तेनायं प्रणिधाय भूमिपतिना धावेन विष्णौ मतिं
प्रान्शुर्विष्णुपदे गिरौ भगवतो विष्णोर्ध्वजः स्थापितः ॥२॥

८. क्षितौ पृथिव्यां सुचिरं दीर्घकालपर्यन्तं स्वभुजार्जितं स्वबाहुपार्जितम् एकाधिराज्यमेकाधिपत्यं प्राप्तेन । समग्रचन्द्रसदृशीं पूर्णेन्दुतुल्यां वक्त्रश्रियं मुखलक्ष्मीं बिभ्रता धारयता चन्द्राह्वेन चन्द्रनाम्ना । आख्याह्वे अभिधानं च नामधेयं च नाम चेत्यमरः । धावेन शुचिना । धावु गतिशुद्ध्योरित्यस्मात्पचाद्यच् । तेन प्रसिद्धेन भूमिपतिना राज्ञा विष्णौ मतिं प्रणिधाय कृत्वा विष्णुपदे तन्नाम्नि गिरौ पर्वते अयं प्रांशुरुन्नतो विष्णोर्ध्वजः केतुः स्थापितः । प्रान्शुरित्युत्कीर्णः पाठश्चिन्त्यः ।

अपनी भुजाओं द्वारा उपार्जित एकाधिराज्य इस पृथ्वी पर चिरकाल तक प्राप्त किया (भोगा), उस पूर्णचन्द्र के समान मुख-कान्ति वाले चन्द्र नाम के शुद्धचरित राजा ने विष्णु में आस्था रख कर विष्णुपद गिरि पर भगवान् विष्णु का यह ऊँचा ध्वज स्थापित किया ।

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

(३) दशपुर-पट्टवायश्रेण्याः शिलालेखः सं० ५२९

पुरा भारते प्रतिनगरं प्रतिजनपदं च शिल्पवृत्तीनां शिल्पिनां निकाया अभवन्। ते च श्रेण्य इत्युच्यन्ते स्म। श्रेणीधर्मास्तु गौतमीयादिषु धर्मसूत्रेषु मनुयाज्ञवल्क्यादिस्मृतिष्वप्युक्ताः अयमेकस्याः पट्टवायश्रेण्या लेखः। इयं हि श्रेणिः पूर्वं लाटदेशे न्यवसत्। पश्चाच्च दशपुरगुणाकृष्टा दशपुरमाजगाम। तत्र च तया सूर्यस्य भवनं कारितम्। कालवशात्किञ्चिद्भग्ने हि तद्देवालये तस्य पुनर्जीर्णोद्धृतिकाले उपनिबद्धोऽयं लेखः।

सिद्धम्।

यो वृत्त्यर्थमुपास्यते सुरगणैः सिद्धैश्च सिद्ध्यर्थिभिः
ध्यानैकाग्रपरैर्विधेयविषयैर्मोक्षार्थिभिर्योगिभिः[1]।
भक्त्या तीव्रतपोधनैश्च मुनिभिः शापप्रसादक्षमै-
र्हेतुर्यो जगतः क्षयाभ्युदययोः पायात्स वो भास्करः ॥१॥
तत्त्वज्ञानविदोऽपि यस्य न विदुर्ब्रह्मर्षयोऽभ्युद्यताः[2]

---

१. विधेया वशगा विषया येषां तैः। विधेयो विनयग्राही वचनेस्थित आश्रव इत्यमरः।

२. अभ्युद्यतास्तत्पराः।

सिद्धि हो। देव-गण, सिद्धि के अभिलाषी सिद्ध-गण, एकाग्र ध्यान में लगे हुए संयमी मोक्षार्थी योगि-गण तथा वर-शाप देने में समर्थ तीव्र तप के धनी मुनि-गण अपनी जीवन यात्रा (वृत्ति) के लिए भक्ति पूर्वक जिसकी उपासना करते हैं, और जो जगत् के क्षय और अभ्युदय का कारण है, वह भास्कर आपकी रक्षा करे ॥१॥ तत्त्व ज्ञान के वेत्ता यत्नवान् ब्रह्मर्षि भी जिसको

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

कृत्स्नं यश्च गभस्तिभिः प्रविसृतैः पुष्णाति लोकत्रयम् ।
गन्धर्वामरसिद्धकिन्नरनरैः संस्तूयतेऽभ्युत्थितो
भक्तेभ्यश्च ददाति योऽभिलषितं तस्मै सवित्रे नमः ॥२॥

यः प्रत्यहं प्रतिविभात्युदयाचलेन्द्र-
विस्तीर्णतुङ्गशिखरस्खलितांशुजालः ।
क्षीबाङ्गनाजनकपोलतलाभिताम्रः
पायात्स वः सुकिरणाभरणो विवस्वान् ॥३॥

३. गन्धर्वा देवगायकाः । अमरा देवाः । सिद्धाः प्राप्ताष्टगुणैश्वर्या विश्वावसुप्रभृतयः । किन्नराः किञ्चिन्नरा अश्वमुखत्वात् । इमे देवयोनिविशेषाः । उक्तञ्चामरेण—विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः । पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनय इति ।

४. अभ्युत्थितोऽभ्युद्गत उदित इत्यर्थः ।

५. उदयाचलेन्द्रस्योदयगिरेर्विस्तीर्णेषु तुङ्गेषून्नतेषु च शिखरेषु स्खलितं अंशुजालं यस्य सः ।

६. क्षीबानां मत्तानाम् अङ्गनाजनानां कपोलतलमिवाभिताम्रो रक्तवर्णः

७. सुकिरणा एवाभरणानि यस्य तथाविधः ।

समझ नहीं पाते, जो फैली हुई किरणों से समूची त्रिलोकी को पुष्टि देता है, उदय होने पर गन्धर्व देवता सिद्ध किन्नर और मनुष्य जिसकी स्तुति करते हैं और जो भक्तों को अभीष्ट वस्तु देता है, उस सविता को नमस्कार हो ॥२॥ उदयाचल-राज के चौड़े और ऊँचे शिखरों से अपनी किरणों के जाल को फिसलाते हुए जो प्रति दिन प्रभासित होता है, मतवाली स्त्रियों के कपोलतल की भाँति लाल, सुन्दर किरणों के आभूषण पहने हुए वह सूर्य आपकी रक्षा करे ॥३॥

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

कुसुमभरानततरुवरदेवकुलसभाविहाररमणीर्यात् ।
लाटविषयान्नगावृतशैला[10] ज्जगति प्रथितशिल्पाः[11] ॥४॥
ते देशपार्थिवगुणापहृताः प्रकाशमध्वादिजान्यविरलान्यसुखान्यपास्य ।
जातादरा दशपुरं प्रथमं मनोभिरन्वागताः ससुतबन्धुजनाः समेत्य[12] ॥५॥

८. कुसुमभरेणानतैस्तरुवरैर्देवकुलैर्मन्दिरैः सभाभिः शालाभिः । सह भान्त्यस्यामिति सभा । वासः कुटी द्वयोः शाला सभेत्यमरः । विहाररारामैर्मठैर्वा रमणीयात् ।

९. नर्मदाताप्योरुपकण्ठं पश्चिमपयोधितीरस्थो देशो लाटविषयः । अत्रैव भरुकच्छसूरतेत्यादिनगर्यः ।

१०. नगैः वृक्षैरावृताः शैला यस्य तस्मात् । शैलवृक्षौ नगावगावित्यमरः ।

११. प्रथितशिल्पाः ते श्रेणीभूताः शिल्पिनो लाटविषयाद्दशपुरमन्वागता इत्युत्तरश्लोकेनसम्बन्धः ।

१२. देशस्य मालवदेशस्य पार्थिवस्य राज्ञश्च गुणैरपहृता आकृष्टास्ते श्रेणीभूताः शिल्पिनः अध्वादिजानि असुखानि अपास्य अविगणय्य । दशपुरं मालवदेशे (अवन्तिषु वा) उज्जयिन्याः पश्चिमोत्तरतः । अद्यत्वे दासोर इति मन्दसोर इति वोच्यते ।

फूलों के भार से झुके सुन्दर पेड़ों देवायतनों सभा-भवनों और विहारों से रमणीय और वृक्षों से ढके पर्वतों वाले लाट देश से चले जगत्प्रसिद्ध शिल्पी (रेशम बुनने वाले) (मालव) देश और उसके राजा के गुणों से खिंच कर और पहले मन में उनके लिए आदर उत्पन्न होने पर रास्ते आदि के प्रकट और घने दुःखों की परवाह न करते हुए अपने बेटों बान्धवों सहित इकठ्ठे दशपुर को चले आये ॥४-५॥

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

[13] मत्तेभगण्डतटविच्युतदानबिन्दु-
सिक्तोपलाचलसहस्रविभूषणायाः।
पुष्पावनम्रतरुमण्डवतंसकाया
भूमेः[14] परं तिलकभूतमिदं क्रमेण[15] ॥६॥
तटोत्थवृक्षच्युतनैकपुष्पविचित्रतीरान्तजलानि[16] भान्ति।
प्रफुल्लपद्माभरणानि यत्र सरांसि कारण्डवसंकुलानि[17] ॥७॥

१३. अतः परं नवभिश्लोकैर्दशपुरं वर्णयति।

१४. मत्तेभानां गण्डतटेभ्यो विच्युतैर्दानबिन्दुभिः सिक्ता उपला येषां तादृशानामचलानां पर्वतानां सहस्रं विभूषणं यस्यास्तथाविधायाः पुष्पावनम्रास्तरव एव मण्डावतंसाः शोभाभूषणानि यस्यास्तादृशायाश्च भूमेर्मालवभूमेः।

१५. क्रमेणेति। मालवभूमिः क्रमेण क्वचिदचलविभूषणा पर्वतैरावृता क्वचिच्च पुष्पतरुशोभिता उद्यानवती।

१६. तटोत्थेभ्यो वृक्षेभ्यश्च्युतैर्नैकपुष्पैर्विचित्राणि तीरान्तानां तटप्रदेशानां जलानि येषां तानि। नैकेति सुप्सुपा इति समासः।

१७. कारण्डवः प्लवस्य (बत्तख इति भाषायां ख्यातस्य पक्षिणो) भेदः।

यह (दशपुर) उस (मालव) भूमि का सुन्दर तिलक रूप है जो कहीं तो मतवाले हाथियों के गालों के किनारों से चुए मद-बिन्दुओं से सिंची चट्टानों वाले हजारों पहाड़ों से विभूषित है और कहीं फूलों से झुके वृक्षों का मण्डन किये है; जहाँ तट पर उगे पेड़ों से टपकते अनेक फूलों के कारण रङ्ग-बिरङ्गे जलों वाले, खिले कमलों से शोभित, बत्तखों से भरे तालाब हैं; और कहीं चञ्चल लहरों द्वारा डुलाये कमलों

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

विलोलवीचीचलितारविन्दपतद्रजःपिञ्जरितैश्च[१८] हंसैः ।
स्वकेसरोदारभरावभुग्नैः[१९] क्वचित्सरांस्यम्बुरुहैश्च भान्ति ॥८॥
स्वपुष्पभारावनतैर्नगेन्द्रै[२०]र्मदप्रगल्भालिकुलस्वनैश्च ।
अजस्रगाभिश्च पुराङ्गनाभिर्वनानि यस्मिन्समलंकृतानि ॥९॥
चलत्पताकान्यबलासनाथा[२१]न्यत्यर्थशुक्लान्यधिकोन्नतानि ।
तडिल्लताचित्रसिताभ्रकूटतुल्योपमानानि[२२] गृहाणि यत्र ॥१०॥

१८. विलोलवीचिभिश्चलितेभ्य आन्दोलितेभ्यः अरविन्देभ्यः कमलेभ्यः पतता रजसा परागेण पिञ्जरितैः पिङ्गलवर्णैः ।

१९. स्वकेसराणां कमलपरागाणामुदारभरेण महता भारेणावभुग्नैर्नम्रैः । उदारो दातृमहतोरित्यमरः ।

२०. नगेन्द्रैर्वृक्षैः ।

२१. अबलासनाथानि स्त्रीसहितानि ।

२२. तडिल्लताभिर्विद्युल्लताभिश्चित्राणां सितानां शुभ्राणामभ्रकूटानां मेघशिखराणां तुल्यमुपमानं येषां तानि । शुक्लत्वादधिकोन्नतत्वाच्च सिताभ्रकूटसादृश्यम् । चलत्पताकत्वादबलासनाथत्वाच्च चित्रत्वं यथा सिताभ्रस्य तडिल्लतया ।

से ढरते पराग के कारण पीले हुए हंसों और अपने केसर के भरपूर भार से झुके कमलों से तालाब शोभायमान हैं;-जिस (दशपुर) में अपने फूलों के भार से झुके बड़े बड़े वृक्षों और मंदमाते भौंरों की गुञ्जारों वाले लगातार चलती पुरनारियों से अलङ्कृत अनेक बगीचे हैं; जहाँ अतिशय उजले ऊँचे ऊँचे मकानों के ऊपर झण्डे फहराते और भीतर गृहिणियां

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

कैलासतुङ्गशिखरप्रतिमानि चान्यान्याभान्ति दीर्घवलभीनि[२३] सवेदिकानि
गान्धर्वशब्दमुखराणि निविष्टचित्रकर्माणि लोलकदलीवनशोभितानि १ ६
प्रासादमालाभिरलङ्कृतानि धरां विदार्यैं [? र्ये] व समुत्थितानि ।
विमानमाल्यसदृशानि यत्र गृहाणि पूर्णेन्दुकरामलानि[२४] ॥१२॥
यद्भात्यभिरम्यसरिद्द्वयेन चपलोर्मिणा समुपगूढम् ।
रहसि कुचशालिनीभ्यां प्रीतिरतिभ्यां स्मराङ्गमिव[२५] ॥१३॥
सत्यक्षमादमशमव्रततौचधैर्यस्वाध्यायवृत्तविनयस्थितिबुद्ध्युपेतैः ।

---

२३. दीर्घा वलभ्यः कूटागाराणि येषां तानि । कूटागारं तु वलभीति चैजयन्ती ।

२४. पूर्णेन्दोः कराः किरणा इवामलानि शुभ्राणि ।

२५. समुपगूढं समाश्लिष्टम् । प्रीती रत्यः सपत्नीत्वेन प्रसिद्धा स्मरस्य पत्नी । यथा हि—सपत्नी संजाता रत्याः प्रीतिरिति श्रुता इति ।

विराजती हैं, मानो लहराती बिजली से रङ्गबिरङ्गे बने सफेद बादलों के खण्ड हों ; और कुछ दूसरे कैलास के ऊँचे शिखरों जैसे, लम्बे लम्बे छज्जों और चबूतरों वाले (ऐसे घर हैं जिनमें) सङ्गीत के शब्द गूँजते रहते हैं, (दीवारों पर) चित्रकारी की हुई है और लहलहाते केलों के बगीचे शोभा देते हैं;—और जहाँ (के और) घर पूर्ण चन्द्रमा की किरणों की तरह झकाझक महलों की परम्परा से अलंकृत ऐसे लगते हैं मानो विमानों की पाँतें भूमि को फाड़कर (उसके भीतर से) उठ खड़ी हुई हों ; जो (दशपुर) चपल तरङ्गों वाली दो रमणीय नदियों के (दोनों तरफ) होने से ऐसा लगता है मानो स्तनशालिनी प्रीति और रति (दोनों पत्नियों) से एकान्त में लिपटाया हुआ कामदेव का देह हो ; जो सचाई क्षमा संयम

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यातपोनिधिभिरस्मयितैश्च[२६] विप्रैर्यद् भ्राजते ग्रहगणैःखमिव प्रदीप्तैः १३
अथ समेत्य निरन्तरसङ्गतैरहरहः प्रविजृम्भितसौहृदाः[२७]।
नृपतिभिः सुतवत्प्रतिमानिताः प्रमुदिता न्यवसन्त सुखं पुरे ॥१५॥
श्रवणसुभगं धानुर्वैद्यं दृढं परिनिष्ठिताः[२९]
सुचरितशतासङ्गाः केचिद्विचित्रकथाविदः[३०]।

२६. अस्मयितैरद्रप्तैः।

२७. अथ ते शिल्पिनः दशपुरे समेत्य निरन्तरसङ्गतैर्मुहुर्मुहुः सङ्गमनैः। प्रविजृम्भितसौहृदाः प्रवृद्धसख्याः।

२८. पट्टवायश्रेण्या वर्गिणः स्वकर्मानुतिष्ठन्तोऽन्यान्यव्यापारेष्वपि ख्यातिं लब्धवन्त इति श्रवणेत्यादि श्लोकद्वयेनाह।

२९. केचिच्छ्रवणसुभगं धनुष्टङ्कारस्य रुचिकारत्वात् कर्णयोरानन्दकरं धानुर्वैद्यं धनुर्वेदोक्तं कर्म दृढं परिनिष्ठितास्तस्मिन् परिनिष्णाता अभूवन्।

३०. सुचरितानां सद्वृत्तानां शतेनासङ्गः सम्बन्धो येषां ते। कथाविदः कथावाचकाः।

शान्ति व्रत स्वच्छता धीरज स्वाध्याय आचार विनय स्थिरता और बुद्धि से सम्पन्न विद्या और तप के धनी निरभिमान ब्राह्मणों से ऐसे चमकता है जैसे उज्ज्वल ग्रहों से आकाश ॥ ६–१४ ॥

(दशपुर में) पहुँच जाने पर बार बार सभाओं में इकट्ठा होने से दिनोंदिन (उन शिल्पियों की) परस्पर-मैत्री बढ़ती गई, राजा लोग उन्हें अपनी सन्तान की तरह मानते रहे और वे सुखपूर्वक नगर में बस गये ॥१५॥ (उनमें से) कुछ लोग कानों को भली लगने वाली धनुर्विद्या में पूरे पारङ्गत हो गये, कुछ सैकड़ों सुचरितों वाली विचित्र कथाओं के ज्ञाता (कथक) बन गये; और कई दूसरे विनीत और शान्त धर्म-प्रसङ्गों का ज्ञान

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

विनयनिभृताः सम्यग्धर्मप्रसङ्गपरायणाः
प्रियमपरुषं पथ्यं चान्ये क्षमा बहु भाषितुम्[31] ॥१६॥
केचित्स्वकर्मण्यधिका[32] स्तथान्यैर्विज्ञायते ज्यौतिषमात्मवद्भिः ।
अथापि चान्ये समरप्रगल्भाः कुर्वन्त्यरीणामहितं प्रसह्य ॥१७॥
प्राज्ञा मनोज्ञवधवः प्रथितोरुवंशा वंशानुरूपचरिताभरणास्तथान्ये।
सत्यव्रताः प्रणयिनामुपकारदक्षा विस्रम्भपूर्वमपरे दृढसौहृदाश्च[33] ॥१८॥
विजितविषयसङ्गैर्धर्मशीलैस्तथान्यैर्मृदुभिरधिकसत्त्वैर्लोकयात्रामरैश्च[34] ।

३१. अन्ये तु धर्मज्ञा राजादिसभासु प्रियं पथ्यं वक्तुं क्षमा वाग्मिनः संजाता इत्यर्थः ।

३२. स्वकर्मणि पट्टवायकर्मण्येव केचिदधिकां ख्यातिं लेभिरे ।

३३. मनोज्ञाः कान्ता वधवः स्नुषा येषां ते । प्रथितः पृथिव्यां प्रख्यात उरुर्महान्वंशो येषां तथाविधाः । मनोज्ञवधुत्वात्सन्तत्याः सौन्दर्यं तेन च वंशप्रख्यातिः । कैश्चित्तस्मिन्नेव गुणे कीर्त्तिरधिगता । अपरेषान्तु विस्रम्भणीयत्वं सत्यसन्धत्वं च प्रसिद्धिमाप ।

३४. लोकयात्रास्वमरैर्देवैरिव ।

प्राप्त कर (सभाओं में) कड़वी न लगने वाली प्रिय और हितकर वक्तृतायें देने में समर्थ (अच्छे वक्ता) बन गये ॥१६॥ कुछ ने अपने ही काम (रेशम बुनने) में बड़प्पन पाया और कुछ ने अपने को वश में कर (परिश्रम कर) ज्यौतिष का ज्ञान प्राप्त किया, कुछ युद्ध में पक्के बने जो डट कर शत्रुओं का संहार करते ॥१७॥ और कुछ समझदार लोग सुन्दर पतोहुओं वाले और ऊँचे वंश वाले प्रसिद्ध हुए,–वंश के अनुरूप आचरण से उनकी शोभा थी। और कुछ लोगों ने सत्य-व्रती स्नेहि-जनों के उपकार में कुशल भरोसा करने योग्य और मैत्री को दृढता से निभाने वाले (होने के कारण प्रसिद्धि पाई) ॥१८॥ दूसरे कुछ लोग विषयों में न फँसने वाले

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वकुलतिलकभूतैर्मुक्तरागैरुदारैरधिकमभिविभाति श्रेणिरेवंप्रकारैः॥१९॥

[35]तारुण्यकान्त्युपचितोऽपि सुवर्णहार–
ताम्बूलपुष्पविधिना समलङ्कृतोऽपि।
नारीजनः प्रि[?श्रि][36]यमुपैति न तावदग्र्यां
यावन्न पट्टमयवस्त्रयुगानि धत्ते ॥२०॥

स्पर्शवता वर्णान्तरविभागचित्रेण नेत्रसुभगेन।
यैः सकलमिदं क्षितितलमलङ्कृतं पट्टवस्त्रेण[37] ॥२१॥

---

३५. अधुना कौशेयवस्त्राणामुत्कर्षमाह।

३६. प्रियमित्यस्य स्थाने श्रियमिति पाठः साधीयान् स्यात्। तारुण्याद्युपेताऽलङ्कृताऽपि नारी पट्टवस्त्रयुगपरिधानं विना अग्र्यां विशिष्टां श्रियं शोभां नोपैति न प्राप्नोतीति। अनेन पट्टवस्त्राणामुत्कृष्टत्वं सूचितम्।

३७. स्पर्शवतेति प्रशंसायां मतुप् यथा रूपवती कन्येत्यत्र। वर्णान्तराणां नानावर्णानां विभागेन चित्रेणाद्भुतेन मनोहारिणा वा पट्टवस्त्रेण कौशेयवस्त्रेण यैः शिल्पिभिः सकलमिदं क्षितितलमलङ्कृतम्। रोमका-

---

धर्मात्मा सौम्य-स्वभाव जीवट वाले और लोक-व्यवहार में देव-तुल्य हुए। वे राग से अलिप्त उदार और अपने कुल के तिलक रूप थे। इन सब प्रकार के लोगों से उस श्रेणि की बड़ी शोभा होती ॥१९॥ यौवन और कान्ति से युक्त और सोने के हार पान फूल आदि से अलंकृत स्त्रियाँ भी तब तक विशेष शोभा नहीं पातीं जब तक एक जोड़ा रेशमी कपड़ा नहीं पहनतीं ॥२०॥

जिन्होंने मुलायम और चिकने विभिन्न रङ्गों के बँटवारे से अद्भुत लगने वाले सुहावने रेशमी कपड़ों से समूची पृथ्वी को सजा दिया था (उन

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्याधरीरुचिरपल्लवकर्णपूर-
वातेरितास्थिरतरं प्रविचिन्त्य लोकम्।
मानुष्यमर्थनिचयांश्च तथा विशालाँ-
स्तेषां शुभा मतिरभूदचला ततस्तु[३८] ॥२२॥

चतुःसमुद्रान्तविलोलमेखलां सुमेरुकैलासबृहत्पयोधराम्।
वनान्तवान्तस्फुटपुष्पहासिनीं कुमारगुप्ते पृथिवीं प्रशासति[३९] ॥२३॥

दिदेशेष्वपि पुरा भारतीयवस्त्राणां प्रचारो बभूवेति सकलक्षितितलालङ्करणं सत्यमेव।

३८. विद्याधरीणां देवयोनिविशेषाणां रुचिराणां पल्लवकर्णपूराणां यद्वातेनेरितमीरणम्। भावे क्तः। तद्वदस्थिरतरं चञ्चलं मानुष्यं लोकं प्रविचिन्त्य। अर्थनिचयाँश्च स्वकीयान् विशालानवलोक्य तेषां वक्ष्यमाणप्रकारेण सूर्यमन्दिरनिर्माणार्थं शुभा मतिरभूदित्यभिप्रायः।

३९. कुमारगुप्ते पृथिवीं सकलभारतं प्रशासति विश्ववर्मा गोप्ता बभूवेत्युत्तरेणान्वयः। कुमारगुप्तः समुद्रगुप्तपुत्रस्य विक्रमादित्याह्वस्य चन्द्रगुप्तस्य पुत्रः। पृथिवीं त्रिभिर्विशेषणैर्वर्णयति। चतुःसमुद्रान्ता एव विलोला मेखला यस्यास्ताम्। सुमेरुकैलासावेव बृहन्तौ पयोधरौ यस्यास्ताम्। वनान्तेषु वान्तैश्च्युतैः स्फुटैर्विकचैश्च पुष्पैर्हासिनीम्।

जुलाहों ने) जब यह देखा कि यह मानव-संसार विद्याधरियों के मनोहर पत्तों के बने करनफूलों के वायु से डोलने की तरह अस्थिर है और अपने पास बड़ा धन-सञ्चय हो गया है, तब उनके मन में यह शुभ सङ्कल्प-(सूर्यमन्दिर बनाने का) उत्पन्न हुआ ॥२१-२२॥

चारों समुद्रों के तट जिसकी डोलती करधनी हैं, सुमेरु और कैलास जिसके बड़े बड़े स्तन हैं, वन पथों में टपकते खिले फूल जिसकी हँसी है, उस

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

समानधीः शुक्रबृहस्पतिभ्यां[४०] ललामभूतो भुवि पार्थिवानाम् ।
रणेषु यः पार्थसमानकर्मा बभूव गोप्ता[४१] नृपविश्ववर्मा ॥२४॥
दीनानुकम्पनपरः कृपणार्तवर्गसन्धाप्रदो[४२] ऽधिकदयालुरनाथनाथः ।
कल्पद्रुमः प्रणयिनामभयप्रदश्च
भीतस्य यो जनपदस्य च बन्धुरासीत् ॥ २५ ॥
तस्यात्मजः स्थैर्यनयोपपन्नो
बन्धुप्रियो बन्धुरिव प्रजानाम् ।
बन्ध्वर्तिहर्ता नृपबन्धुवर्मा
द्विड्दृप्तपक्षक्षपणैकदक्षः[४३] ॥ २६ ॥

४०. शुक्रो दैत्यगुरुः । बृहस्पतिः सुरगुरुः ।

४१. गोप्ता देशाधिष्ठाता राजनियुक्तः । सर्वेषु देशेषु विधाय गोप्तृनिति कुमारगुप्तपुत्रस्य स्कन्दगुप्तस्य गिरिनगरोत्कीर्णे लेखे ।

४२. कृपणार्तवर्गेभ्यः सन्धाप्रदस्तेषु मैत्रीपर इत्यर्थः ।

४३. द्विषां शत्रूणां दृप्तस्याभिमानिनः पक्षस्य क्षपणे संहारे एको ऽद्वितीयो दक्षः ।

पृथ्वी (भारतभूमि) पर जब कुमारगुप्त का शासन जारी था, तभी शुक्र और बृहस्पति के समान बुद्धिवाला, पृथ्वी के राजाओं का भूषणरूप युद्ध में अर्जुन के तुल्य राजा विश्ववर्मा (मालव देश का) गोप्ता (सूबेदार) था, जो दीनों पर दया करने वाला, दरिद्रों दुखियाओं का मित्र, अनाथों का नाथ, बड़ा दयालु, सहिजनों के लिए कल्पवृक्ष के समान, डरे हुओं को अभय देनेवाला और राष्ट्र का बन्धु था ॥ २३–२५ ॥ उसका बेटा राजा बन्धुवर्मा हुआ जो स्थिर बुद्धि और नीतिमान्, बन्धुओं का प्रिय, प्रजा का बन्धु-समान, बन्धुओं का दुःखहर्ता और शत्रुओं और अभिमानियों का पक्ष

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रान्तो युवा रणपटुर्विनयान्वितश्च
राजाऽपि सन्नुपसृतो न मदैः स्मयाद्यैः।
शृङ्गारमूर्तिरभिभात्यनलङ्कृतोऽपि
रूपेण यः कुसुमचाप इव द्वितीयः॥ २७॥
वैधव्यतीव्रव्यसनक्षतानां
स्मृत्वा यमद्याप्यरिसुन्दरीणाम्।
भयादुभवत्यायतलोचनानां
घनस्तनायासकरः प्रकम्पः॥ २८॥
तस्मिन्नेव क्षितिपतिवृषे[४४] बन्धुवर्मण्युदारे
सम्यक् स्फीतं[४५] दशपुरमिदं पालयत्युन्नतांसे।

४४. क्षितिपतिवृषे क्षितिपतिश्रेष्ठे। शुक्रले मूषिके श्रेष्ठे सुकृते वृषभे वृष इत्यमरः।

४५. स्फीतं प्रवृद्धम्।

को नष्ट करने में एक ही होशियार था; जो कमनीय जवान युद्ध-कुशल और विनयी था, राजा होते हुए भी मद ऐंठ आदि जिसके नजदीक न फटकते, जो मानो मूर्तिमान् शृङ्गार भूषण धारण किये बिना भी चमकता और रूप में मानों दूसरा कामदेव था॥२६-२७॥ जिसे यादकर वैधव्य के कठोर दुःख से चोट खाई हुई बड़ी बड़ी आँखों वाली शत्रु-सुन्दरियों को भय से आज भी घने स्तनों को कष्ट देनेवाली कँपकँपी छुट जाती है॥२८॥ उसी राजाओं के शिरोमणि ऊँचे कन्धों वाले उदार बन्धुवर्मा के इस विस्तृत दशपुर का भली-भाँति पालन करते समय श्रेणि में संघटित जुलाहों ने

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

शिल्पावाप्तैर्धनसमुदयैः पट्टवायैरुदारं
श्रेणीभूतै[४६] र्भवनमतुलं कारितं दीप्तरश्मेः[४७] ॥२६॥
विस्तीर्णतुङ्गशिखरं शिखरिप्रकाशं[४८]
मभ्युद्गतेन्द्वमलरश्मिकलापगौरम्[४९] ।
यद्भाति पश्चिमपुरस्य[५०] निविष्टकान्त-

४६. श्रेणीभूतैः श्रेण्यां संहतैर्नत्वेकैकश इत्यर्थः ।

४७. दीप्तरश्मेः सूर्यस्य ।

४८. मन्दिरं वर्णयति विस्तीर्णेत्यादिना । शिखरिप्रकाशं पर्वतसदृशम् ।

४९. अभ्युद्गतस्याभ्युदितस्येन्दोरमलरश्मीनां कलाप इव गौरं शुभ्रम् ।

५०. पश्चिमपुरस्य पश्चिमदेशस्य राजधान्या दशपुरस्येत्यर्थः । देवसभायाः परतः पश्चाद्देश इति राजशेखरः । देवसभं तु कदाचिदाधुनिकं देवासनगरं भवेत् । देशस्य पश्चिमत्वं त्वन्तर्गेह्यपेक्षया । तथा हि राजशेखरेण काव्यमीमांसायामुद्धृताऽऽचार्योक्तिः—विनशनप्रयागयोर्गङ्गायमुनयोश्चान्तरमन्तर्वेदी । तदपेक्षया दिशी विभजेतेति । विनशनमदर्शनं वा कुरुक्षेत्रस्य पश्चिमदक्षिणतः शैरीषक–(सिरसा)–निकटे सरस्वत्या मरुभूमौ लोपस्थानम् । पुरं नगरं वेति राजधानीवाचकम् । तथा हि रायपसेणीसूत्रव्याख्याने–नगरं राजधानी, पांसुप्राकारनिबद्धं खेटं, क्षुल्लकप्राकारवेष्टितं खर्वटमिति । दशपुरं हि वैक्रमषष्ठशताब्दयां

अपने शिल्प में कमाई हुई धनराशि से सूर्य का अनूठा उदार भवन बनवाया, जो कि पहाड़ की तरह चौड़े और ऊँचे शिखरों वाला, उगे चन्द्रमा की निर्मल किरणधारा की तरह उजला और पश्चिम देश की

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

चूडामणिप्रतिसमं[५१] नयनाभिरामम् ॥३०॥

रामासनाथरचने[५२] दरभास्करांशु-
वह्निप्रतापसुभगे[५३] जललीनमीने ।
चन्द्रांशुहर्म्यतलचन्दनतालवृन्त-
हारोपभोगरहिते[५४] हिमदग्धपद्मे ॥३१॥

रोध्रप्रियंगुतरुकुन्दलताविकोश-

पश्चिमदेशस्य राजधान्यभूदित्युपरिष्टादुद्घ्रियमाणाद्यशोधर्मकालिकले-खाज्ज्ञायते ।

५१. निविष्टस्य धृतस्य कान्तस्य चूडामणेःप्रतिसमम् ।

५२. रामेत्यादिभिश्चतुर्भिश्लोकैर्निर्मितिकालं हेमन्तं वर्णयति । रामाभिः सनाथा रचना गृहाणि यस्मिन्निति ।

५३. दरेषु वनदरीषु भास्करांशुरूपा वह्निस्तत्प्रतापेनसुभगे मनोरमे । अथवा दरा विरला ये भास्करांशवस्तेषां वह्नेश्च प्रतापेन सुभगे ।

५४. चन्द्रांशूनां हर्म्यतलानां चन्दनस्य तालवृन्तानां व्यजनानां हाराणाञ्चोपभोगेन सेवनेन रहिते । निदाघकाल एवामीषामुपयोगात् ।

राजधानी में जड़े हुए मनोहर चूडामणि की तरह सुन्दर है ॥२९-३०॥

मालवों के गण के ठहराव के अनुसार (चले हुए संवत् के) चार सौ तिरानवे बरस बीत जाने पर, उस ऋतु में जब कि रमणियों से भवन सनाथ होते हैं, उपवनों के रास्तों में सूर्य की किरणों और आग की गरमी भली लगती है, मछलियाँ पानी में छिपी रहती हैं, चाँदनी महलों के नीचे के खण्डों चन्दन पङ्खों और हारों का उपयोग नहीं किया जाता, जब पाला कमलों को मार डालता है, लोध प्रियङ्गु और कुन्दलता के खिले फूलों का रस पिये हुए प्रफुल्ल भौंरे मनभावने लगते हैं, उस काल

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

पुष्पासवप्रमुदितालिकुलाभिरामे[५५] ।
काले तुषारकणकर्कशशीतवात-
वेगप्रनृत्तलवलीनगणैकशाखे[५६] ॥३२॥
स्मरवशगतरुणजनवल्लभाङ्गनाविपुलकान्तपीनोरु-
स्तनजघनघनालिङ्गननिर्भर्त्सिततुहिनहिमपाते[५७] ॥३३॥
मालवानां गणस्थित्या[५८] याते शतचतुष्टये ।

---

५५. रोध्राणां लोध्राणां प्रियङ्गुतरूणां कुन्दलतानां च विकोशानि विगता कोशा येषां तादृशानि विकचानीत्यर्थः पुष्पाणि तेषामासवेन प्रमुदितेनालिकुलेनाभिरामे मनोहारिणि ।

५६. तुषारकणैर्हिमकणैः कर्कशस्य शीतस्य वातस्य वेगेन प्रनृत्ता लवलीनां हरफारेवड़ीत्याख्यलतानां नगणानां च पुष्पविशेषाणां एकाः सौन्दर्यादिहेतोरद्वितीयाःशाखा यस्मिँस्तस्मिन् काले ।

५७. स्मरवशगैर्मदनाभिभूतैः तरुणजनैर्वल्लभानामङ्गनानां विपुलानां पृथूनां कान्तानामभिरामाणां पीनानाञ्च ऊरूणां स्तनानां जघनानां च घनेनालिङ्गनेनाश्लेषेण निर्भर्त्सितस्तिरस्कृतस्तुहिनस्यातिशीतस्य हिमस्य पातो यस्मिन् ।

५८. गणाः सङ्घाः, नानाजातीनामनेकवृत्तीनामेकदेशवास्तव्यानां निकायाः । स्थितिः संवित् समयक्रिया, यथाविधि सभायां समूहेन कृत आम्नायो निर्णयो वा । मालवगणेन संविदा प्रवर्त्तितो वैक्रमाब्दः ।

में जब कि पाले के कनों से खुरखुरी ठण्डी हुई वायु के वेग से नचाई हुई लवली और नगण की शाखायें अनूठी जान पड़ती हैं, काम-वश युवक लोग अपनी प्यारी अङ्गनाओं की बड़ी और मनोहर जाँघों स्तनों और पेड़ुओं से कस कर लपटा कर पाले का प्रतीकार करते हैं, जब कि बादलों की आवाज़

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिनवत्यधिकेऽब्दानामृतौ सेव्यघनस्वने[५९] ॥३४॥
सहस्यमासशुक्लस्य[६०] प्रशस्तेऽह्नि त्रयोदशे ।
मङ्गलाचारविधिना प्रासादोऽयं[६१] निवेशितः ॥३५॥
बहुना समतीतेन कालेनान्यैश्च पार्थिवैः ।
व्यशीर्यतैकदेशोऽस्य[६२] भवनस्य ततोऽधुना ॥३६॥
स्वयशोवृद्धये सर्वमत्युदारमुदारया[६३] ।

प्राक्तनेषूत्कीर्णलेखेषु स सर्वत्र मालवगणाब्द एवाभिधीयते । मालवा हि पुरा क्षुद्रकैः सार्धं वाह्लीकेषु (पञ्जाबदेशे) न्यवसन् । ततः प्रोषिता अवन्तीनाजग्मुः । यदा हि प्रथमशका उज्जयिनीमाचक्रमुस्तदा मालवगणस्तदन्तिक एव चर्मण्वतीतीर उवास । कर्कोटनगरं तेषां राजधानी यदद्यत्वे जयपुरराज्ये नगर इति नगरककोड़ इति वा प्रसिद्धम् । तेषां शकैः सार्धं युद्धमप्येकस्मिँश्छकलेख उल्लिखितम् । एतच्चानुमीयते यत्प्रतिष्ठानपतिना विक्रमादित्येन मालवैश्च मिलित्वा परास्ताः शकाः । मालवगणसंविदा च प्रवर्त्तितो विजयाब्दः । तमेवाधुना वैक्रमाब्दमिति ब्रूमः ।

५९. सेव्यो भावोद्दीपकत्वादभिनन्दनीयो घनानां स्वनः शब्दो यस्मिँस्तस्मिन्समये । हेमन्तकाल इत्यर्थः ।

६०. सहस्यः पौषमासः । पौषे तैषसहस्यौ द्वे इत्यमरः ।

६१. प्रासादो देवतायतनं मन्दिरम् । प्रासादो देवभूभुजामित्यमरः ।

६२. व्यशीर्यत अभज्यतेत्यर्थः ।

६३. उदारं महत् । उदारो दातृमहतोरित्यमरः ।

अच्छी लगती है, पूस महीने की प्रशस्त तेरस के दिन मङ्गलाचार-विधि से इस देवस्थान की प्रतिष्ठा की गई ॥३१–३५॥

बहुत काल बीत जाने पर और अन्य राजाओं के समय में इस भवन

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कारितमिदं भूयः श्रेण्या भानुमतो गृहम् ॥३७॥
अत्युन्नतमवदातं नभः स्पृशन्निर्वै[६४] मनोहरैः शिखरैः ।
शशिभान्वोरभ्युदयेष्वमलमयूखायतनभूतम्[६५] ॥३८॥
वत्सरशतेषु[६६] पञ्चसु विंशत्यधिकेषु नवसु चाब्देषु ।
यातेष्वभिरम्यतपस्यमास[६७] शुक्लद्वितीयायाम् ॥३९॥
स्पष्टै[६८]रशोकतरुकेतकसिन्दुवार-
लोलातिमुक्तकलतामदयन्तिकानाम् ।
पुष्पोद्गमैरभिनवैरधिगम्य नून-
मैक्यं विजृम्भितशरे हरपूतदेहे[६९] ॥४०॥

६४. स्पृशन्निति पुंल्लिङ्गं चिन्त्यम् ।

६५. अमलानां मयूखानां किरणानामायतनभूतमाश्रयभूतम् ।

६६. संस्कारकालं सूचयति वत्सरेत्यादिना ।

६७. तपस्यः फाल्गुनमासः । फाल्गुनः स्यात्तपस्यः फाल्गुनिक इत्यमरः ।

६८. स्पष्टैरित्यादिना श्लोकद्वयेन ऋतुं वर्णयति ।

६९. अशोकतरूणां केतकानां [केवड़ा इति भाषायाम्] सिन्दु-

का एक हिस्सा टूट गया; सो अब उदार श्रेणि (शिल्पियों के संघ) ने बीस और नौ ऊपर पाँच सौ बरस बीत जाने पर (५२९ गत सम्वत् में) मनभावने फागुन महीने की शुक्ल दूज को, ऐसे काल में जब कि खिले हुए अशोक केवड़े संभालू लहलहाते मोतिये और मदयन्तिका के फूलों के रूप

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

मधुपानमुदितमधुकरकुलोपगीतनगणैकपृथुशाखे[७०] ।
काले नवकुसुमोद्गमदन्तुरकान्तप्रचुररोध्रे[७१] ॥४१॥
शशिनेव नभो विमलं कौस्तुभमणिनेव शार्ङ्गिणो वक्षः[७२] ।
भवनवरेण तथेदं पुरमखिलमलङ्कृतमुदारम् ॥४२॥

वाराणां निर्गुण्डीनां (संभालू इति भाषायाम्) लोलानामतिमुक्तकलतानां (मोतिया इति भाषायाम्) मदयन्तिकानाञ्च। अभिनवैः पुष्पोद्गमैरैक्यमभिन्नतामधिगम्य हरेण पूतः अग्निदाहात्पवित्रीकृतः देहो यस्य तथाविधे कामदेवे विजृम्भितशरे प्रवृद्धशरे सति।

७०. मधुपानेन मुदितैर्मधुकरकुलैरुपगीता गुञ्जिता नगणानामेका अद्वितीयाः पृथुशाखा यस्मिँस्तथाविधे समये।

७१. नवकुसुमानामुद्गमैर्दन्तुरा उन्नताः कान्ताः प्रचुरा रोध्रा यस्मिँस्तस्तिन् काले।

७२. शार्ङ्गिणो विष्णोः।

में कामदेव अपने बाण खींचे हुए हैं, मधुपान से हरषाये भौंरों से गुँजाई नगणों की मोटी मोटी शाखायें अनूठी लगती हैं और नये फूलों के निकलने से उभरे हुए सुन्दर लोध भरपूर हैं, सूर्य के इस शानदार गृह की जो बहुत ऊँचा और उजला है, सुन्दर शिखरों से मानो आकाश को छूता और चाँद और सूर्य के उदय के समय निर्मल किरणों से भर जाता है, मरम्मत करा दी ॥३६-४१॥

चाँद से जैसे निर्मल नभ और कौस्तुभ मणि से विष्णु की छाती, उसी प्रकार इस सुन्दर भवन से यह समूचा महान् नगर शोभायमान् है ॥४२॥

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

अमलिनशशिलेखादन्तुरं पिङ्गलानां
परिवहति समूहं यावदीशो जटानाम् ।
विकट[ः च]कमलमालामंससक्तां च शार्ङ्गी
भवनमिदमुदारं शाश्वतं तावदस्तु ॥४३॥
श्रेण्यादेशेन भक्त्या च कारितं भवनं रवेः ।
पूर्वा[७३] चेयं प्रयत्नेन रचिता वत्सभट्टिना ॥४४॥
स्वस्ति कर्तृलेखकवाचकश्रोतृभ्यः। सिद्धिरस्तु ।

७३. पूर्वा पूर्वोक्ता प्रशस्तिरियम् ।

जब तक शिव अपने तामड़े जटाजूट को, जिसमें विमल चन्द्रकला उभरी हुई है, और विष्णु अपने कन्धे पर खिले कमलों की माला को धारण करते हैं, तब तक यह शानदार भवन बराबर बना रहे ॥ ४३ ॥ श्रेणि की आज्ञा से भक्ति पूर्वक रवि का भवन बनाया गया। और ऊपर-लिखी प्रशस्ति वत्सभट्टि ने जतन से बनाई ॥ ४४ ॥ (प्रशस्ति को) बनाने वाले खोदने वाले वाचकों और श्रोताओं का कल्याण हो ॥ सिद्धि हो ॥

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

(४) दशपुरे यशोधर्म्मराजकालिकः कूपशिलालेखः सं० ५८६ ।

गुप्तानां राज्यकाले मङ्गोलदेशोत्तरवास्तव्या हूणा नाम म्लेच्छाः स्वदेशान्निर्गता वङ्क्षु (आमू)-तीरमध्यूषुः । रघुवंशेऽपि वङ्क्षुतटे हूण-वर्णनम् । तद्यथा—

विनीताध्वश्रमास्तस्य वङ्क्षुतीरविचेष्टनैः ।
दुधुवुर्वाजिनः स्कन्धाँल्लग्नकुङ्कुमकेसरान् ॥४—६७॥
तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥४—६८॥

ततो भारतमपि प्रविष्टास्ते हूणा राज्ञा स्कन्दगुप्तेन युध्युच्छिन्नाः । स्कन्दगुप्तस्य हूणविजयस्मारको भगवते विष्णवे समर्पितो लेखालङ्कृतो विजयस्तम्भकोऽद्यापि गाजीपुरविषये भितरीग्रामेऽवतिष्ठते । प्रायेण सार्ध-पञ्चशतमिते वैक्रमाब्दे पुनरपि भारतमाचक्रमुर्हूणाः । तदा हि तेषां राजा तोरमाणः पूर्वमालवपर्य्यन्तदेशमधिचक्रे । तथा च तत्रारिकि-णनगरे (इदानीं सागरविषयान्तर्गते एरणेत्याख्ये ग्रामे) अद्यापि एकस्मिँ-ल्लेखे तोरमाणनाम वर्तते । तोरमाणस्य पुत्रो मिहिरकुलोऽतिनृशंसः प्रजापीडकश्चाऽभूत् । तं हि गुप्तवंश्यो राजा बालादित्यः कथञ्चिन्मध्यदेशा-न्निष्कासयामास । तदा गुप्तराजानामक्षमतां विलोक्य पश्चिमदेशे जननायको यशोधर्मा नाम कश्चिदुत्थाय हूणान् पराबभूव सकलं च कश्मीरोत्कल-कामरूपमहाराष्ट्रावधिकं देशं स्वाधीनं चकार । दशपुर एव तस्यापि विजयस्तम्भो वर्तते । तत्र चैते श्लोकाः—

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

ये भुक्ता गुप्तनाथैर्न सकलवसुधाक्रान्तिदृष्टप्रतापै-
र्नाज्ञा हूणाधिपानां क्षितिपतिमुकुटाध्यासिनी यान् प्रविष्टा ।
देशाँस्तान् धन्वशैलद्रुमगहनसरिद्वीरबाहूपगूढान्
वीर्यावस्कन्नराज्ञः स्वगृहपरिसरावज्ञया यो भुनक्ति ॥
आलौहित्योपकण्ठात्तलवनगहनोपत्यकादामहेन्द्रा-
दागङ्गाश्लिष्टसानोस्तुहिनशिखरिणः पश्चिमादापयोधेः ।
सामन्तैर्यस्य बाहुद्रविणहृतमदैः पादयोरानमद्भि-
श्चूडारत्नांशुराजिव्यतिकरशबला भूमिभागाः क्रियन्ते ॥
स्थाणोरन्यत्र येन प्रणतिकृपणतां प्रापितं नोत्तमाङ्गं
यस्याश्लिष्टो भुजाभ्यां वहति हिमगिरिर्दुर्गशब्दाभिमानम् ।
नीचैस्तेनापि यस्य प्रणतिभुजबलावर्जनक्लिष्टमूर्ध्ना
चूडापुष्पोपहारैर्मिहिरकुलनृपेणार्चितं पादयुग्मम् ॥ इति ॥

यशोधर्म्मणा पश्चिमदेशे राजस्थानीयपदे नियुक्तोऽभयदत्तस्तदनु तद्भ्रातृव्यो धर्म्मदोषश्च । धर्म्मदोषानुजो दक्षो दशपुरे कूपमेकं कारितवान् । तत्रैवोत्कीर्णोऽयं लेखः । अस्मादभिलेखाद् दक्षस्य वंशवृक्ष इत्थमवगम्यते—



annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद्धम् ।

स जयति जगतां पतिः पिनाकी[1] स्मितरवगीतिषु यस्य दन्तकान्तिः ।
द्युतिरिव तडितां निशि स्फुरन्ती तिरयति[2] च स्फुटयत्यदश्च विश्वम् ॥१॥

स्वयम्भूर्भूतानां स्थितिलयसमुत्पत्तिविधिषु
प्रयुक्तो येनाज्ञां वहति भुवनानां विधृतये ।
पितृत्वं चानीतो जगति गरिमाणं गमयता[3]
स शम्भुर्भूयांसि प्रतिदिशतु भद्राणि भवताम् ॥२॥

फणमणिगुरुभाराक्रान्तिदूरावनम्रं
स्थगयति रुचमिन्दोर्मण्डलं यस्य मूर्ध्नाम् ।

१. पिनाको धनुरस्यास्तीति पिनाकी शिवः । शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ।···पिनाकी प्रमथाधिप इत्यमरः ।

२. तिरयति अपिदधाति । स्फुटयति प्रकाशयति ।

३. येन शम्भुना स्वयम्भुवं जगति गरिमाणं गमयता स्वयम्भूः पितृत्वमानीत इति युज्यते ।

सिद्धि हो । जय हो उस लोकों के पालक पिनाक (धनुष)-धारी की जिसके मुसकाने बोलने और गाने में (खिलते हुए) दाँतों की शोभा रात में फुरती बिजलियों की चमक की तरह इस संसार को (कभी) ढक देती और (फिर) प्रकट कर देती है ॥ १ ॥ जिसके द्वारा प्राणियों की स्थिति, प्रलय और उत्पत्ति के कार्यों में नियुक्त स्वयम्भू (ब्रह्मा) लोकों के धारण के लिए आज्ञा को मानते हैं, और (इस प्रकार) जिसने (ब्रह्मा को) जगत् में बड़प्पन देते हुए पिता-पद पर पहुँचा दिया है, वह शिव आपका बहुत बहुत कल्याण करें ॥ २ ॥ अपने फनों की मणियों का बड़ा भार पड़ने से बहुत अधिक झुका हुआ जिसके मस्तकों का मण्डल (शिव-मस्तक पर स्थित) चन्द्रमा की कान्ति को फीका कर देता है,

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

स शिरसि विनिबध्नन् रन्ध्रिणीमस्थिमालां
सृजतु भवसृजो वः क्लेशभङ्गं भुजङ्गैः ॥३॥
षष्ट्या सहस्रैः सगरात्मजनानां खातः खतुल्यां रुचमादधानः ।
अस्योदपानाधिपतेश्चिराय यशांसि पायात्पयसां विधाता ॥४॥
अथ जयति जनेन्द्रः श्रीयशोधर्म्मनामा

४. फणमणीनां गुरुभारस्याक्रान्त्यापतनेन दूरावनम्रं नितरामवनतं यस्य फणिनो मूर्ध्नां मण्डलम् इन्दोः शिवभालस्थस्य रुचं कान्तिं स्थगयति आवृणोति । स भवसृजः शिवस्य शिरसि रन्ध्रिणीं रन्ध्रयुक्तामस्थिमालां विनिबध्नन् भुजङ्गो वः क्लेशभङ्गं सृजतु । रन्ध्रिणीशब्देन भुजङ्गः सूत्ररूपेणास्थिमालां बध्नातीति व्यज्यते ।

५. खतुल्यामाकाशसदृशीं रुचं कान्तिं नीलिमानमित्यर्थः ।

६. उदपानाधिपतेः कूपनिर्मातुः । पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वेत्यमरः । उदकं पिवन्त्यस्मिन्नित्यर्थे अधिकरणे ल्युट्, उदकस्योदः संज्ञायामिति उदकस्योदादेशः ।

७. पयसां विधाता अर्णवो वरुणो वा ।

८. जनेन्द्रो जननायकः । अनेन शब्देन राजवंशेऽनुत्पन्नस्यापि हूणानामुच्छेदकस्य स्वपराक्रमादिगुणगरिम्णैव राज्यपदमासवतो यशोधर्मणः सकललोकानां प्रीतिपात्रत्वं द्योत्यते । अयमेवाभिप्रायोऽग्रिमपद्यान्तर्गतैर्विजयते जगतीं पुनश्चेति शब्दैर्व्यज्यते ।

और जो (नरकपाल की) हड्डियों की छेद वाली माला को (सूत्ररूप से) शिव के सिर पर बाँधे हुए है, वह सर्प आपके क्लेशों का नाश करे ॥ ३ ॥ सगर के साठ हज़ार बेटों से खोदा गया, आकाश की सी कान्ति को धारण करने वाला जलों का विधाता (समुद्र या वरुण) इस कुएँ के मालिक की कीर्त्ति की बहुत समय तक रक्षा करे ॥ ४ ॥

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमदवनमिवान्तः[९] शत्रुसैन्यं विगाह्य[१०]।
व्रणकिसलयभङ्गै[११]र्योऽङ्गभूषां विधत्ते
तरुणतरुलतावद्वीरकीर्त्तीर्व्विनाम्य ॥५॥
आजौ जिती[१२] विजयते जगतीम्पुनश्च
श्रीविष्णुवर्धननराधिपतिः स एवं[१३]।
प्रख्यात औलिकरलाञ्छन[१४] आत्मवङ्शो[१५]
येनोदितोदितपद[१६] गमितो गरीयः ॥६॥

९. यत्र सस्त्रीको राजा क्रीडति तदुद्यानं प्रमदवनमित्युच्यते। पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम्। स्यादेतदेव प्रमदवनमन्तःपुरोचितमित्यमरः।

१०. विगाह्य आलोड्य।

११. व्रणा एव किसलयानि तेषां भङ्गै रचनाभिः।

१२. जितमस्यास्तीति जिती। इष्टादिभ्यश्चेतीनिः।

१३. विष्णुवर्धन इति यशोधर्मोपनाम।

१४. औलिकरलाञ्छन औलिकरेतिनामा। औलिकरेति तद्वंशस्य प्राकृतं नाम।

१५. वङ्श इत्युत्कीर्णः पाठः। वंश इति पठितव्यम्। तथाऽन्यत्राप्यूह्यम्।

१६. उदितमुदितं च पदमुदितोदितपदमत्युच्चपदमित्यर्थः।

इसके बाद, जय हो श्रीयशोधर्मा-नामक जनता के नेता की जो शत्रु-सेना को अन्तःपुर के क्रीडोद्यान की तरह बीच से मथ कर और वीरों की कीर्त्तियों को फूलते वृक्षों की डालों की तरह झुका कर घावरूपी पत्र-रचनाओं से (अपने) अङ्गों का शृङ्गार करता है ॥ ५ ॥ युद्ध में पृथ्वी (भारतवर्ष) को जीतने वाले नृपति श्रीविष्णुवर्धन की फिर फिर जय हो, जिसने औलि-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राचो नृपान् सुबृहतश्च बहूनुदीचः[१७]
साम्ना युधा च वशगान् प्रविधाय येन ।
नामापरं जगति कान्तमदो दुरापं
राजाधिराजपरमेश्वर इत्युदूढम्[१८] ॥७॥
स्निग्धश्यामाम्बुदाभैः स्थगितदिनकृतो यज्वनामाज्यधूमै-
रम्भो मेध्यं मघोनावधिषु विदधता गाढसम्पन्नसस्याः ।
संहर्षाद्वाणिनीनां कररभसहृतोद्यानचूताङ्कुराग्रा
राजन्वन्तो रमन्ते भुजविजितभुवा भूरयो येन देशाः[१९] ॥८॥

१७. प्राचः पूर्वदिग्वर्त्तिनः । उदीच उत्तरदिग्वर्त्तिनः ।

१८. उदूढं धृतं प्राप्तमिति यावत् ।

१९. येन भूरयो देशा राजन्वन्तो रमन्ते इति वाक्ययोजना । कीदृशास्ते देशाः ? स्निग्धानां श्यामानां च पयः पूरितत्वादम्बुदानां मेघानामिवाभा येषां तैर्यज्वनामाज्यधूमैः स्थगितः पिहितो दिनकृद्येषु तादृशाः । पुनः कीदृशाः ? अवधिषु नियतकालेषु स्वराज्यसीमाभिः परिवेष्टिते सर्वस्मिन् राष्ट्रे इति वा । मेध्यं यज्ञधूमसम्भूतत्वात्पवित्रम् । अम्भो

कर उपनाम वाले अपने प्रख्यात वंश को बहुत ऊँचे पद पर पहुँचा दिया है, जिसने पूरब के बड़े बड़े और उत्तर के बहुत से राजाओं को सन्धि और विग्रह से वश में करके लोक में प्रिय और दुर्लभ राजाधिराज परमस्वामी का यह दूसरा उपनाम प्राप्त किया है; जिस अपनी भुजाओं से पृथ्वी को जीतने वाले राजा के सुराज्य में अनेक देश सुख पाते हैं—ऐसे देश जिनमें चिकने काले बादलों जैसे याजकों के घी के धुएँ सूर्य को ढक लेते हैं, (जहां) इन्द्र द्वारा समय पर पवित्र जल बरसाते रहने से भरपूर अनाज होता है और विलासिनी स्त्रियाँ मस्ती से बगीचों में आमों के (मौर के) अंकुरों को चचल हाथों से नोचा करती हैं; जिसकी ऊँचे झंडों वाली,

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

यस्योत्केतुभिरुन्मदद्विपकरव्याविद्धलोध्रद्रुमै-
रुद्धूतेन वनाध्वनि ध्वनिनदद्विन्ध्याद्रिरन्ध्रैर्ब्बलैः ।
बालेयच्छविधूमरेण रजसा मन्दाङ्शु (मन्दांशु) संलक्ष्यते
पर्यावृत्त शिखण्डिचन्द्रक इव ध्यामं रवेर्म्मण्डलम्[२०] ॥९॥

जलं विदधता मधोना इन्द्रेण गाढं प्रचुरं यथा स्यात्तथा सम्पन्नानि सस्यानि येषु ते। पुनर्देशानेव वर्णयन्नाह-वाणिनीनां विदग्धवनितानाम्। वाणिनी नर्त्तकीमत्तविदग्धवनितासु चेति मेदिनी। करैः रभसेन हृतान्युद्यानानां चूताङ्कुराणामग्राणि येषु ते भूरयो देशा भुजविजितभुवा येन यशोधर्मणा राजन्वन्तः स्वधर्मनिष्ठराजयुक्ता रमन्ते मोदन्ते। राजन्वान् इति राजन्वान् सौराज्ये इत्यनेन निपात्यते। सुराज्ञि देशे राजन्वान्स्यात्ततोऽन्यत्र राजवानित्यमरः।

२०. यस्य राज्ञो यशोधर्मणो बलैरुद्धूतेन रजसा रवेर्मण्डलं मन्दांशु संलक्ष्यत इति सम्बन्धः। कीदृशैर्बलैरुत्केतुभिरुद्गताः केतवो येषामुत्पताकैरिति। पुनश्च उन्मदानां द्विपानां करैः शुण्डाभिर्व्याविद्धा उत्पाटिता लोध्रद्रुमा यैस्तैः। बालेयस्य गर्दभस्य छवेरिव धूमरेण धूसरेण रजसा मन्दांशु रवेर्मण्डलं पर्यावृत्तः परावृत्तो यः शिखण्डिचन्द्रको मयूरपिच्छवर्त्तिचन्द्राकृतिः स इव ध्यामं मलिनं संलक्ष्यते। खररासभचक्रीवद्वाहबालेयगर्दभा इति वैजयन्ती। बालेभ्यो हित इति क्षीरस्वामिनो निष्पत्तिः।

मदमाते हाथियों की सूंडों से लोध के पेड़ों को तोड़ती जाती, आवाज़ से विन्ध्याचल की गुफाओं को गुंजा देने वाली सेनाओं (के प्रयाण) से वनमार्ग में उठी गधे के रङ्ग की सी मटमैली धूल से धुँधला सूर्य का गोला उलटे मोरपंख का चँदवा सा दिखाई देता है ॥६-६॥

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्य प्रभोर्व्वंशकृतां[21] नृपाणां पादाश्रयाद्विश्रुतपुण्यकीर्तिः ।
भृत्यः स्वनैभृत्यजितारिषट्क आसीद्वसीयान् किल षष्ठिदत्तः[22] ॥१०॥
हिमवत इव गाङ्गस्तुङ्गनम्रः प्रवाहः
शशभृत इव रेवावारिराशिः प्रथीयान् ।
परमभिगमनीयः शुद्धिमानन्ववायो
यत उदितगरिष्णुस्तायते नैगमानाम्[23] ॥११॥
तस्यानुकूलः कुलजात्कलत्रात् सुतः प्रसूतो यशसां प्रसूतिः ।

---

२१. वंशकृतां पूर्वजानाम् ।

२२. स्वनैभृत्येन स्वविनीतवृत्तितया जितमरिषट्कं येन स षष्ठिदत्तः वसीयान् किलासीत् । वसीयान् अतितरां धनसम्पन्न इत्यर्थः । वसीयानिति वसुशब्दादीयसुनि साधुः । वसुशब्दादेव इष्ठनि वसिष्ठ इति यथा। शब्दस्यास्य गुणवचनत्वेन भूयान् प्रयोगो वैदिकवाङ्मये दृश्यते । तथा च अजादी गुणवचनादेवेति नियमभङ्गोऽप्यत्र न शङ्कनीयः ।

२३. यतः उदितगरिष्णुः षष्ठिदत्तान्नैगमानामन्ववायो वंशस्तायते विस्तारं लभते । नैगमा निगमाख्यनिकायभूता वणिजः । रेवायाश्चन्द्रोद्भवत्वं प्रसिद्धम् । तथा हि—रेवा तु नर्मदा सोमोद्भवा मेकलकन्यकेत्यमरः ।

उस स्वामी के पूर्वज राजाओं के चरणों में रहने से विख्यात् पुण्य और यश वाला, विनीत भाव से छहों शत्रुओं (कामक्रोधादि) को जीतने वाला षष्ठिदत्त नाम का सम्पन्न सेवक था; जिस उन्नतगौरव वाले (षष्ठि दत्त) से हिमालय से गङ्गा के ऊँचे और नम्र प्रवाह की तरह तथा चन्द्रमा से नर्मदा की विशाल जलराशि की तरह नैगमों (नगर के संघटित व्यापारियों) का बड़ा पूजनीय और शुद्ध वंश फैला ॥१०-११॥ उसका कुलीन भार्या से उसके अनुकूल ही यशस्वी पुत्र पैदा हुआ, जिस विष्णु के अंश-समान जिते-

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

हरेरिवाङ्शं वशिनं वराहं वराहदासं यमुदाहरन्ति ॥१२॥
सुकृतिविषयितुङ्गं रूढमूलं धरायां
स्थितिमपगतभङ्गां स्थेयसीमादधानम् ।
गुरुशिखरमिवाद्रेस्तत्कुलं स्वात्मभूत्या
रविरिव रविकीर्तिः सुप्रकाशं व्यधत्त[२४] ॥१३॥
बिभ्रता शुभ्रमभ्रंशि स्मार्तं वर्त्मोचितं सताम् ।
न विसंवदिता[?विसंवादिता] येन कलावपि कुलीनता[२५] ॥१४॥

२४. रविकीर्तिस्तत्कुलं स्वात्मभूत्या सुप्रकाशं व्यधत्तेति सम्बन्धः । कुलं विशिनष्टि सुकृत्यादिना । सुकृतिभिर्विषयिभिर्लोकयात्रादक्षैश्च धर्मार्थकामसमन्वितैरिति यावत् पुरुषैस्तुङ्गमुन्नतं तच्छब्दितत्तकुलम् । पुनश्चापगतभङ्गां स्थेयसीं स्थितिं मर्यादामादधानम् । रविकीर्त्तिर्वराहदासस्य पुत्रो वा वंशजो वा ।

२५. शुभ्रमभ्रंशि स्मार्त्तं स्मृत्युपदिष्टं सतामुचितं वर्त्म मार्गं बिभ्रता पालयता अनुसरता इत्यर्थः । न विसंवादिता न विपर्यासिता न दूषितेत्यर्थः ।

निद्य और सुयोग्य को वराहदास कहते हैं ॥१२॥ (उसके बाद) उस पुण्यकर्मा और संसारी पुरुषों के कारण ऊँचे, पृथ्वी में बद्धमूल, न टूटने वाली दृढ़ स्थिति को धारे हुए पर्वत के ऊँचे शिखर के समान उस कुल को रविकीर्त्ति ने सूर्य की तरह प्रकाशित किया; जिसने स्मृत्युक्त और सज्जनों के अनुरूप मार्ग को (और इसीलिए) उज्ज्वल अङ्गि (यश) को धारण करते हुए कलियुग में भी कुलीनता के विपरीत आचरण नहीं किया ॥१३-१४॥

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

धुतधीदीधितिध्वान्तान् हविर्भुज इवाध्वरान् ।
भानुगुप्ता ततः साध्वी तनयाँस्त्रीनजीजनत्[२६] ॥१५॥
भगवद्दोष इत्यासीत् प्रथमः कार्य्यवर्त्मसु ।
आलम्बनं बान्धवानामन्धकानामिवोद्धवः[२७] ॥१६॥
बहुनयविधिवेधा[२८] गह्वरेऽप्यर्थमार्गे
विदुर इव विदूरं प्रेक्षया[२९] प्रेक्षमाणः ।

२६. ततो रविकीर्त्तेः साध्वी भानुगुप्ता तदाख्या पत्नी त्रींस्तनयानजीजनत् । कीदृशान् ? धुतं विद्रावितं धीदीधितिभिर्मतिमयूखैर्ध्वान्तं तमोऽज्ञानात्मकं यैरिति हविर्भुज इवाध्वरान् अग्नेरिव यज्ञानिति च ।

२७. भगवद्दोषस्तेषां प्रथम आसीत् । कार्याणां धर्मकर्मणां वर्त्मसु पथिषु । तेषां त्रयाणां तनयानां मध्ये भगवद्दोषो ज्येष्ठ आसीत् स एव च कार्यवर्त्मसु कृत्यवस्तुषु उपायचिन्तादिषु प्रथमः प्रमुखः । बान्धवानामितरेषाम् आलम्बनम् आश्रयभूतश्च तथासीत् यथा अन्धकानां मध्ये उद्धवः । यादववंशस्य भीमस्य सात्वतस्य पुत्रावन्धकवृष्णी । अन्धकस्य वंशजा अन्धकाः । वृष्णिवंश्यो हि भगवान् कृष्णः । अन्धकवंश्य उद्धवो नीतिशास्त्रे नितरां निष्णात आसीत् ।

२८. बहुनयविधिषु वेधा स्रष्टा इव ।

२९. प्रेक्षया प्रज्ञया । प्रेक्षा नृत्येक्षणं प्रज्ञेत्यमरः ।

उस (रविकीर्त्ति) से साध्वी भानुगुप्ता ने अग्नि से यज्ञों के समान, बुद्धि-किरणों से (अज्ञान-) अन्धकार को दूर करने वाले तीन बेटों को जन्म दिया ॥ १५ ॥ (उनमें) पहला भगवद्दोष था (जो) कामकाज में अपने बन्धुओं का, अन्धकों का उद्धव सा, सहारा था; (जो) बहुविध नीति-संचालन में प्रजापति सा और गहन आर्थिक-राजनीतिक मामलों में

annath Bhattarai Collection. Nagarjun-7, Kathmandu, N

CC-0. Digitized by eGangotri and MIDF- Delhi

वचनरचनबन्धे संस्कृतप्राकृते यः
कविभिरुदितरागं गीयते गीरभिज्ञः[30] ॥ १७ ॥
प्रणिधिदृगनुगन्त्रा यस्य बौद्धेन चाक्ष्णा
न निशि तनु दवीयो वास्त्यदृष्टं धरित्र्याम्[31] ।
पदमुदयि दधानोऽनन्तरं तस्य चाभूत्स
भयमभयदत्तो नाम चिन्वन् प्रजानाम्[32] ॥१८॥
विन्ध्यस्यावन्ध्यकर्मा शिखरतटपतत्पाण्डुरेवाम्बुराशे-
र्गोलाङ्गूलैः सहेलं प्लुतिनमिततरोः पारियात्रस्य चाद्रेः ।

---

३०. संस्कृतप्राकृते वचनानां वाक्यानां रचनस्य बन्धे प्रबन्धे यो भगवद्दोषः कविभिरुदितरागमुदितो रागो यस्मिन् कर्मणि तद् यथा स्यात्तथा सहर्षमित्यर्थः। गीरभिज्ञो वाणीकुशलो गीयते निगद्यते ।

३१. प्रणिधिदृगनुगन्त्रा चारचक्षुरनुगामिना यस्य बौद्धेनाक्ष्णा दृष्ट्या धरित्र्यां निशि दवीयोऽतिदूरे स्थितं तनु सूक्ष्ममपि वा वस्तु अदृष्टं नास्ति ।

३२. भगवद्दोषानुजोऽभयदत्तः । स प्रजानां भयं चिन्वन्संहन्नासीत् ।

भी विदुर के समान अपनी बुद्धि से दूर तक देखने वाला (था); जिसे कवि लोग बड़े अनुराग से संस्कृत प्राकृत वाक्य-रचना और प्रबन्ध में प्रवीण कहते (थे) ॥ १६–१७ ॥ उसके बाद (दूसरा) ऊँचे पद को धारण करने और प्रजाओं के भय को समेटने वाला वह अभयदत्त हुआ, जिसकी दूत-रूप चक्षु की अनुगामी बुद्धि की आँख से धरती पर कोई सूक्ष्म या दूर की वस्तु रात में (भी) छिपी न रहती; जो किसी काम में विफल न होने वाला, चोटियों से झरती शुभ्र नर्मदा की जलराशि वाले विन्ध्याचल और लंगूरों की खेल-भरी कूदफाँद से झुकते वृक्षों वाले

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

आसिन्धोरन्तरालं निजशुचिसचिवाध्यासितानेकदेशान्
राजस्थानीयवृत्त्या सुरगुरुरिव यो वर्णिनां भूतयेऽपात्[33] ॥१९॥

३३. योऽवन्ध्यकर्मा सफलकार्यो विन्ध्यस्य पारियात्रस्यासिन्धोरन्तरालं निजसचिवाध्यासितोऽनेकदेशान् राजस्थानीयवृत्त्याऽपादिति वाक्ययोजना। विन्ध्याद्रिः खलु नर्मदा-शोण-तमसा(टोंस)-शुक्तिमती (केन)-दशार्णा (धसान) ऽऽदीनां नदीनां जनकः। पारियात्रस्तत्पश्चिमे वर्णाशा (बनास)-परा-चर्मण्वती (चम्बल)-विदिशा-वेत्रवती (बेतवा) शिप्रादिनदीनामुद्भवस्थानम्। तस्यैवांशभूत आड़ावला (अरावली इत्यांग्लभाषायाम्) इति प्रसिद्धः पर्वतो मालवदेशस्था गिरयश्च। विन्ध्यस्तु पारियात्रात्पूर्वतः। तथा हि वायुपुराणे—

वर्णाशा चन्दना चैव सतीरा महती तथा।
परा चर्मण्वती चैव विदिशा वेत्रवत्यपि।
शिप्रा ह्यवन्ती च तथा पारियात्राश्रयाः स्मृताः॥ इति॥
(अ० ४५, श्लो० ९७–९८)

मार्कण्डेयपुराणेऽपि ५७तमेऽध्याये १९ श्लोकादारभ्य तदेवोक्तम्। नर्मदाद्यास्तु नद्यो मार्कण्डेयपुराणे स्कन्धपादप्रसूता उक्ताः, वायुपुराणे च ऋक्षपादात्प्रसूता इति। तदुभयं पाठदोषात्। यतो हि विष्णुपुराणे उक्तम्—नर्मदासुरसाद्याश्च नद्यो विन्ध्यविनिर्गता इति (२।३।१०)।

विन्ध्यं वर्णयन्नाह—शिखरेति। शिखरतटेभ्यः पतन्तः पाण्डवः शुभ्राः रेवायाः नर्मदाया अम्बूनां राशयः संघाता यत्रेति। रेवाया उद्गमादनतिदूरे भेड़ाघाट इत्यादिप्रसिद्धस्थानेऽभयतः शुभ्रमर्मरोपलपरिवृतत्वा-

पारियात्र पर्वत से (पच्छिमी) समुद्र तक के बीच के अपने ईमानदार सचिवों से अधिष्ठित अनेक देशों की राजस्थानीय (राजप्रतिनिधि = वाइसराय) की हैसियत से बृहस्पति की तरह चारों वर्ण वालों के कल्याण के लिए पालना करता था॥ १८-१९॥

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

विहितसकलवर्ण्णासङ्करं शान्तडीम्बं [? डिम्बं]
कृत इव कृतमेतद्येन राज्यं निराधि[34]।
स धुरमयमिदानीं दोषकुम्भस्य[35] सूनु-
र्गुरु वहति तदूढां धर्म्मतो धर्म्मदोषः ॥२०॥
स्वसुखमनतिवाच्छं[च्छ]न्दुर्गमेऽध्वन्यसङ्गां[36]
धुरमतिगुरुभारां यो दधद् भर्तुरर्थे।

त्पाण्डुत्वं सर्वथा सङ्गतम्। पारियात्रं वर्णयति—गोलांगूलैः लंगूर इति ख्यातैः सहेलं प्लुतिभिः कूर्दनैर्नमितास्तरवो यस्य तस्येति। निजैः स्वकीयैः शुचिभिः सचिवैरध्यासितानेकदेशान्। राजस्थानीयो राजप्रतिनिधिः वायसराय इत्यांग्लभाषायाम्। 'तस्य वृत्त्या वर्णिनां ब्राह्मणक्षत्रियवैश्यशूद्राणां भूतयेऽपात्। एतेनाऽभयदत्तस्य पश्चिमदेशे यशोधर्मराजस्थानीयत्वेनाधिष्ठानं दशपुरस्य च तद्राजधानीत्वमवगम्यते।

३४. विहितः सकलानां वर्णानामसङ्करो यत्र तत्। शान्ता डिम्बा विप्लवा यत्र तच्च। डिम्बे डमरविप्लवावित्यमरः। निराधि आधिशून्यम्। पुंस्याधिर्मानसी व्यथेत्यमरः। कृत इव कृतयुग इव।

३५. दोषकुम्भोऽभयदत्तानुजः। तस्य सूनुर्धर्मदोषोऽभयदत्ते दिवं गते राजस्थानीयपदे नियुक्तः।

३६. असङ्गां सहायशून्याम्।

अब (अभयदत्त के छोटे भाई) दोषकुम्भ का बेटा यह धर्म्मदोष उस (अभयदत्त) द्वारा उठाये गये (राज्य कार्य के) भारी जुए को धर्मपूर्वक वहन करता है, जिसने इस राज्य को सब वर्णों का संकर हटा कर और विप्लवों का शमन कर कृतयुग की तरह आधि-शून्य कर दिया है; जो अपने स्वामी (यशोधर्मा) के लिए अपने सुख की विशेष परवा किये

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

वहति नृपतिवेषं केवलं लक्ष्ममात्रम्
वलिनमिव विलम्बं कम्बलं बाहुलेयः[३७] ॥२१॥
उपहितहितरक्षामण्डनो जातिरत्नै-
र्भुज इव पृथुलांसस्तस्य दक्षः कनीयान्[३८] ।
महदिदमुदपानं खातयामास[३९] बिभ्र-
च्छ्रुतिहृदयनितान्तानन्दि निर्दोष नाम ॥२२॥
सुखाश्रेयच्छायं परिणतिहितस्वादुफलदं
गजेन्द्रेणारुग्णं द्रुम इव [?मिव] कृतान्तेन बलिना[४०] ।

३७. बाहुलेयो वृषः । बाहुलेयो गुहे वृष इति वैजयन्ती । वलिनं वलिमन्तम् । विलम्बं लम्बमानं कम्बलं गलकम्बलमिवेति । नृपवेषं केवलं चिह्नमात्रं वृषगलकम्बलवद्वहतीत्यर्थः ।

३८. उपहिता तत्परिग्रहे धृता या हितानां रक्षा तदेव मण्डनं यस्य सः । यथा भुजस्य मण्डनं जातिरत्नैः सर्वोत्कृष्टरत्नैः । जातिः प्रशस्ता जातिः । तस्य धर्मदोषस्य कनीयान् भ्राता दक्षः ।

३९. खातयामास खानयामासेत्यर्थः । खातं गर्तं तस्मान्नामधातुः ।

४०. गजेन्द्रेणारुग्णं छिन्नं द्रुममिव कृतान्तेनाकाले गृहीतं पितृव्य-

---

बिना राज्य के अति-भारी धुरे को दुर्गम मार्ग में (भी) अकेले उठाता हुआ राजा के वेष को केवल चिन्ह मात्र (मानता हुआ) बैल के संलों वाले लटकते गल-कम्बल की तरह धारण करता है ॥ २०-२१ ॥

उसके छोटे भाई दक्ष ने, जो चौड़े कन्धों वाला है तथा सौंपे गये हितों की रक्षा करने से जिसकी वैसी ही शोभा है जैसी कीमती रत्नों से भुजा की होती है, कानों और हृदय को अत्यन्त आनन्द देने वाले निर्दोष नाम के इस बड़े कुएँ को खुदवाया ॥ २२ ॥ जैसे किसी सुख से सेवन करने योग्य छाँह वाले और पक कर हितकारी और स्वादु फल देने वाले

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

पितृव्यं प्रोद्दिश्य प्रियमभयदत्तं पृथुधिया
प्रथीयस्तेनेदं कुशलमिह कर्म्मोपरचितम्[४१] ॥२३॥
पञ्चसु शतेषु शरदां यातेष्वेकान्नवतिसहितेषु[४२]।
मालवगणस्थितिवशात्कालज्ञानाय लिखितेषु ॥२४॥
यस्मिन् काले कलमृदुगिरां कोकिलानां प्रलापाः
भिन्दन्तीव स्मरशरनिभाः प्रोषितानां मनांसि[४३]।

मित्यर्थः। द्रुमं वर्णयन्नाह—सुखेनाश्रेया सेव्या छाया यस्य तम्। पुनः परिणत्या हितानि स्वादूनि फलानि ददातीति तथाविधम्।

४१. कर्म्म कूपम्।

४२. कूपनिर्माणकालं कथयति। एकात् नवति एकोननवतीत्यर्थः।

४३. निर्मितिमासं चैत्रं श्लोकद्वयेन वर्णयन्नाह। कुसुमसमयमासेऽयं निर्मापित इत्यग्रिमेण श्लोकेन सम्बन्धो विज्ञेयः। प्रोषितानां देशान्तरगतानाम्।

पेड़ को हाथी तोड़ गिराए, वैसे ही जिसे बलवान् काल ने गिरा दिया उस अपने प्रिय ताया अभयदत्त की याद में बुद्धिमान् (दक्ष) ने यह बड़ी और कौशलपूर्ण (कुएँ की) इमारत बनवाई ॥ २३ ॥ मालव गण के ठहराव से काल-ज्ञान के लिए लिखे गये ५८६ बरस बीत जाने पर, जिस समय मधुर-कोमल-कण्ठी कोयलों के अलाप काम के बाणों की तरह प्रवासियों के मनों को छेदते हैं, जब भौंरों के झुण्डों की भर्राई हुई ध्वनि कामदेव के कँपाई डोर वाले धनुष की तरह बन बन में गूँजती सुनाई देती है, और जिस समय पवन प्रियतमों से रूठी मानिनी स्त्रियों के रागभरे मुग्ध

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

भृङ्गालीनां ध्वनिरनुवनं भारमन्द्रश्च यस्मि-
न्नाधूतज्यं धनुरिव नदच्छूयते पुष्पकेतोः[४४] ॥२५॥
प्रियतमकुपितानां रामयन्बद्धरागं
किसलयमिव मुग्धं मानसं मानिनीनाम् ।
उपनयति नभस्वान्मानभङ्गाय यस्मिन्[४५]
कुसुमसमयमासे तत्र निर्मापितोऽयम् ॥२६॥
यावत्तुङ्गैरुदन्वान् किरणसमुदयं सङ्गकान्तं तरङ्गै-
रालिङ्गन्निन्दुबिम्बं गुरुभिरिव भुजैः संविधत्ते सुहृत्ताम्[४६] ।

४४. भृङ्गालीनां मधुकरपङ्क्तीनां भारेण पुष्पमधुभरेण मन्द्रो ध्वनिर्यस्मिन्समयेऽनुवनं वने वने पुष्पकेतोर्मदनस्य आधूता ईषत्कम्पिता ज्या मौर्वी यस्य तथाविधं धनुरिव नदच्छ्रूयते ।

४५. यस्मिन् काले नभस्वान् पवनः प्रियतमकुपितानां मानिनीनां मानभंगाय बद्धरागं मुग्धं मानसं किसलयमिव रामयन्प्रीणयन् उपनयति । रमयन्निति स्थाने रामयन्निति प्रयोगो मितां ह्रस्व इत्यत्र केषाञ्चिन्मते वेत्यनुवर्तनात्साधुः ।

४६. उदन्वानुदधिः । किरणसमुदयं किरणानां समुदयो यस्य तथाविधं समुदितकिरणं सङ्गकान्तमुदन्वतः सङ्गेन कान्तं मनोहारि इन्दुबिम्बं तरङ्गैर्गुरुभिर्भुजैरिवालिङ्गन् सुहृत्तां तेन सह मैत्रीं विधत्ते । यावज्जलनिधिचन्द्रमसौ विद्येते इत्यर्थः ।

मन को नये पल्लव की तरह बहलाता हुआ मान छोड़ने के लिए ले चलता है, उस फूलों के मास (वसन्त) में यह (कुआँ) बनवाया गया ॥२४-२६॥

जब तक समुद्र ऊँची उठती हुई तरङ्गों से–मानो बड़ी बड़ी भुजाओं से–खिली किरणों वाले और उसके साथ होने (या उसमें प्रतिबिम्बित होने)

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

बिभ्रत्सौधान्तलेखावलयपरिगतिं मुण्डमालामिवायं
सत्कूपस्तावदास्तामृतसमरसस्वच्छविष्यन्दितास्बुः[४७] ॥२७॥
धीमां [? मान्] दक्षो दक्षिणः सत्यसन्धो
ह्रीमाँच्छूरो वृद्धसेवी कृतज्ञः ।
बद्धोत्साहः स्वामिकार्येष्वखेदी
निर्दोषोऽयं पातु धर्मं चिराय ॥२८॥
उत्कीर्णा गोविन्देन[४८] ।

---

४७. सौधस्य कूपोपरि निर्मिताया वेदिकाया अन्तेषु प्रान्तभागेषु लेखानां यानि वलयानि इष्टकारचिता वृत्ताकृतिलेखास्तेषां परिगतिं परिमण्डलमनेकानि लेखावलयानीत्यर्थः। बिभ्रत् दधत् । अमृतसमरसं सुधातुल्यस्वादं स्वच्छं प्रसन्नं विष्यन्दितं प्रवहदम्बु यस्य तथाविधश्च कूपः।

४८. इयं प्रशस्तिरित्यर्थः ।

से सुन्दर लगने वाले चन्द्रबिम्ब का आलिंगन करता हुआ अपनी मैत्री प्रकट करता है, तब तक यह अमृत-समान स्वाद वाले स्वच्छ बहते पानी का कुआँ, जो जगत के किनारे पर बने (इंटों के) कई गोल घेरों को मुंडमाला की तरह धारण किये हुए है, बना रहे ॥ २७ ॥ बुद्धिमान् चतुर उदार सच्चा लाजवाला शूर वृद्धों की सेवा करने वाला कृतज्ञ उत्साही और स्वामी के कार्यों में कभी न ऊबने वाला यह निर्दोष दक्ष चिरकाल तक धर्म की रक्षा करे ॥ २८ ॥ (यह प्रशस्ति) गोविन्द ने खोदी ॥

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

(५) विग्रहराजस्य दिल्ली-स्तम्भलेखः

सम्वत् १२२०।

यशोधर्म्मणि दिवं गते मौखरिवंश्यै राजभिरुत्तरभारते स्वसाम्राज्यं स्थापितम्। तेषां राजधानी कान्यकुब्जनगरी आसीत्। तानन्तु तत्रैव राज्यमकुर्वन् प्रतिहारवंश्याः सम्राजः। वैक्रमदशमशताब्दया उत्तरार्धे तु कान्यकुब्जसाम्राज्यस्याऽक्षैषीत् तेजः। तदा प्रान्तेषु माण्डलिकानि समुत्थितानि राज्यानि। तेषामन्यतमं मालवदेशे परमारराज्यम्, यस्य राजधानी धारेति प्रसिद्धा। धाराधिपो भोजराजो वैक्रमैकादशशताब्दी-मध्येऽभूत्। तस्य समकालिको गजनीशस्तुरुष्को महमूदः। तेन हि सकलो-त्तरभारतराज्यानि पराभूतानि, अधिकृतौ वाहीक (पंजाब)-सौवीर(सिन्ध)-देशौ, कान्यकुब्जराज्यं च करदं व्यधायि। स च करस्तुरुष्कदण्ड इत्युत्कीर्ण-लेखेषु प्रसिद्धः। मृत्युमुपागते महमूदे मालवराजेन भोजेन चेदिराजेन च कर्णेन तद्वंशभवानान्तुरुष्काणाम्भारते प्रगतिर्निरुद्धा। चन्द्रनाम्ना च गाहड्वालवंश्येन नृपतिना कान्यकुब्जमधिकृत्य तत्र स्वराज्यं स्थापयित्वा तुरुष्कदण्डो निवारितः। तदा राजस्थानदेशे शाकम्भरी (साम्भर)-नगर्यां चाहमानराजवंशो राज्यं चकार। तस्य वाहीकदेशसान्निध्यात् तुरुष्कैः सार्द्धं प्रायो युद्धान्यभूवन्। शाकम्भरीशेन वीसलदेवोपनामकेन विग्रहराजेन आसिका-ढिल्लिका (हांसी-दिल्ली)-नगर्यावधिकृत्य आहि-मालयं कुरुक्षेत्रदेशात्तुरुष्का निष्कासिताः। तस्य चायमभिलाष आसीद्यत्तद्वंशजास्सकलादपि वाहीकदेशादुत्सारयेयुस्तुरुष्कानिति। हिमा-लयोपत्यकायां विग्रहराजेनैकस्मिन्नशोकराजस्तम्भेऽयं लेखोऽभिनिबद्धः। स च स्तम्भः पश्चाद्दिल्लीशेन तुरुष्कराजेन फीरोजेन पञ्चदशवैक्रमश-ताब्दारम्भे दिल्लीमानीतोऽद्यापि 'फिरोजशाह का कोटला' इत्याख्ये स्थाने वर्तते। तत्रैवायं लेखोऽशोकलेखादधस्तादस्ति।

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

ओं ॥ संवत् १२२० वैशाख शुति[1] १५ ॥

शाकम्भरीभूपतिश्रीमदावेल्लदेवात्मजश्रीमद्वीसलदेवस्य ॥

॥ ओं अम्भो नाम रिपुप्रियानयनयोः प्रत्यर्थिदन्तान्तरे
प्रत्यक्षाणि तृणानि, वैभवमिलत्काष्ठं यशस्तावकम् ।
मार्गो लोकविरुद्ध एव विजनः शून्यं मनो विद्विषाम्
श्रीमद्विग्रहराजदेव ! भवतः प्राप्ते प्रयाणोत्सवे[2] ॥ १ ॥

---

१. शुति इति शुक्लतिथावित्यस्य संक्षेपः । तद्वत् बहुलदिवसे शुक्लदिवसे इत्यनयोः संक्षेपौ वदि शुदि इति च ।

२. हे श्रीमद्विग्रहराजदेव ! भवतः प्रयाणोत्सवे शत्रून्प्रति गमनोत्सवे प्राप्ते रिपुप्रियानयनयोः शत्रुस्त्रीचक्षुषोः अम्भोऽश्रुजलं नाम । प्रत्यर्थिनां शत्रूणां दन्तान्तरे दशनमध्ये तृणानि प्रत्यक्षाणि विलोक्यन्ते इत्यर्थः । दशनान्तरे तृणानि धारयन्शत्रुर्गौरहमिति निवेदयति । गोव्रादिनश्चावध्यत्वमुक्तं शास्त्रेषु । तथा हि गौतमेनोक्तम्—न दोषो हिंसायामाहवे । अन्यत्र व्यश्वसारथ्यायुधकृताञ्जलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारिरूढगोब्राह्मणव्रादिभ्य इति । तथा महाभारतेऽपि शान्तिपर्वणि—

ओं ॥ सम्वत् १२२० वैशाख सुदि १५॥

साम्भरं के राजा श्रीमान् आवेल्लदेव के पुत्र श्रीमान वीसलदेव का (लेख) ॥ श्रीमान् विग्रहराज देव, तुम्हारे शत्रुओं पर चढ़ाई करने का क्षण आने पर शत्रु स्त्रियों की आँखों में तो पानी (आँसू) है और शत्रुओं के दाँतों तले तिनके दिखाई देते हैं। तुम्हारी कीर्ति ऐश्वर्य के कारण दिशाओं में व्याप्त है, लोकाचार के विपरीत (अनाचार का) मार्ग ही खाली और शत्रुओं का मन शून्य (हो गया) है ॥ १ ॥ हे क्रीडाओं के आगार

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

लीलामन्दिर सोदरेषु भवतु स्वान्तेषु वामभ्रुवाम्
शत्रूणां तु न विग्रहक्षितिपते न्याय्योऽत्र वासस्तव ।
शङ्का वा पुरुषोत्तमस्य भवतो नास्त्येव वारां निधे-
र्निर्म्मथ्यापहृतश्रियः किमु भवान् क्रोडे न निद्रापितः[3] ॥ २ ॥

बालवृद्धौ न हन्तव्यौ न स्त्री न चैव पृष्ठतः ।
तृणपूर्णमुखश्चैव न तवास्मीति वादिनम् ॥
(अ० ९८, श्लो० ३९)

तावकं तावकीनं यशः कीर्तिः वैभवमिलत्काष्ठं वैभवात् हेतोः अतिशयकारणात् मिलन्त्यः काष्ठाः दिशो यत् तादृशम् । अतितरां व्याप्तं त्वदीयं यशो दिगन्तेषु गत्वा सङ्गतमित्याशयः । लोकविरुद्धो सदाचारविरुद्धो मार्गः पन्था एव विजनः जनशून्यः । विद्विषां शत्रूणां मनः चित्तं शून्यम् अप्रतिभम् । अत्र बाणभट्टस्यैतत्पद्यमवधेयम्—

आयातः कथमप्ययं स्मृतिपथं शून्यीभवच्चेतसाम् ।
नागेन्द्रः सहते न मानसगतानाशागजेन्द्रानपि ॥ इति ।

३. हे लीलानिकेतन ! विग्रहराजेति । तव वासो वामभ्रुवां स्त्रीणां स्वान्तेषु भवतु । न तु शत्रूणां तत्र वासः स्यात् । कीदृशेषु स्वान्तेषु तव सोदरेषु सजातीयेष्विति । अत्र भवतः पुरुषोत्तमस्य शंका नास्त्येव । यतो हि वारिधिं निर्मथ्यापहृतायाः श्रियः क्रोडे भवान् किं न निद्रापितः?

विग्रहराज, सजातीय सुन्दरियों के हृदयों में तेरा निवास हो, पर शत्रुओं का न हो, यही उचित है। पुरुषोत्तम (विष्णु) स्वरूप आपको इसमें कोई शंका है ही नहीं, क्योंकि आप क्या समुद्र मथकर निकाली गई लक्ष्मी की गोद में नहीं सुलाये गये हो ? (शत्रु-समुद्र के मथन से प्राप्त विजयश्री का उपभोग करते हो) ॥ २ ॥ ओं। विन्ध्याचल से लेकर हिमालय तक

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

ओं ॥ आविन्ध्यादाहिमाद्रेर्व्विरचितविजयस्तीर्थयात्राप्रसङ्गा-
दुद्दृग्रीवेषु प्रहर्त्ता नृपतिषु विनमत्कन्धरेषु प्रसन्नः ।
आर्यावर्त्तं यथार्थं पुनरपि कृतवान्म्लेच्छविच्छेदनाभि-
र्द्देवः शाकम्भरीन्द्रो जगति विजयते वीसलक्षोणिपालः ॥ २ ॥
त्रूते [ब्रूते] संप्रति चाहमानतिलकः शाकम्भरीभूपतिः
श्रीमद्विग्रहराज एष विजयी सन्तानजानात्मनः ।
अस्माभिः करदं व्यधायि हिमवद्विन्ध्यान्तरालं भुवः
शेषस्वीकरणाय माऽस्तु भवतामुद्योगशून्यं मनः ॥ ४ ॥

४. विग्रहराजेन कुरुक्षेत्रदेशे जिते तद्राज्यसीमा हिमवन्तं प्राप्ता । मद्वंशजाः कुरुक्षेत्रात्परतो वाहीकानपि महमूदवंशजेभ्य उद्धरेयुरिति तस्या-देशः । विग्रहराजस्य दायादो हि तद्धातृव्यः पृथ्वीराजः । स हि वीरोऽपि

जिसने तीर्थयात्रा करते करते ही जीत लिया है, (और उस प्रदेश में) सिर उठाने वाले राजाओं पर जो चोट करता और अपने सामने झुकने वालों को प्रसाद दिखाता रहा है, विदेशियों को उखाड़ कर जिसने आर्या-वर्त्त को फिर से ठीक अर्थों में आर्यावर्त्त बनाया है, उस साम्भर के स्वामी राजा बीसलदेव की जय हो ॥ ३ ॥ वह चौहान वंश का तिलक साम्भर का राजा विजयी विग्रहराज अब अपने वंशजों से कहता है (कि) हमने हिमा-चल से विन्ध्य के बीच का भूप्रदेश कर देने वाला (अधीन) बना दिया है, बाकी (पंजाब आदि) के स्वीकार (विजय) करने में तुम्हारा मन उधम-रहित न रहे (अर्थात् बाकी प्रदेश जीतने में तुम उद्योगशील रहना) ॥४॥

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्वत् श्रीवि[?वै]क्रमादित्ये १२२० वैशाख शुति १५ गुरौ ॥ लिखितमिदं राजाऽऽदेशात् ज्योतिषिक्श्रीतिलकराजप्रत्यक्षं गौडान्वयकायस्थमाहवपुत्रश्रीपतिना । अत्र समये महामन्त्री राजपुत्र-श्रीसल्लक्षणपालः ॥

सन्नदूरदर्शी पितृव्यादेशमुपेक्षमाणो वाहीकोद्धारे निजबलमनियुज्य जेजाकभुक्ति (जझौती, बुन्देलखण्ड)–राजं परमर्दिनामानमभिचक्रमे । एवं च मिथो युध्यमानौ शाकम्भरीजेजाकभुक्तिराजावुभावपि श्रान्तौ क्षीणसत्त्वौ च सञ्जातौ । ततो गौरीवंश्येन शहाबुद्दीनाख्येनाक्रान्तः पृथ्वीराजः । एकदा परास्तेनापि तेन पुनरप्याक्रम्य पृथ्वीराजो हतस्तद्राज्यं च जितम् । चन्दवरदायीत्याख्येन भाषाकविना लिखिताः पृथ्वीराजविषयास्सकला अपि कथाः सर्वथा कल्पिता निर्मूला-श्चेति विज्ञेयम् ।

विक्रमादित्य के सम्वत् १२२० वैशाख सुदी १५ बृहस्पतिवार का यह राजा के आदेश से ज्यौतिषी श्रीतिलकराज के सामने गौडवंशी कायस्थ माहव के पुत्र श्रीपति ने लिखा । इस समय राजकुमार श्रीसल्लक्षणपाल महामन्त्री (प्रधानामात्य) हैं ॥

२०७० साल श्रावण २५ गते

annath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

सामान्यतस्तु दृष्टाद् अतीन्द्रियाणां प्रतीतिरनुमानात्
तस्मादपि चासिद्धम् परोक्षमाप्तागमात् सिद्धम् ॥६॥

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

परीक्षोपयोगिपुस्तके—

[१]

स्वप्नवासवदत्तनाटकम् ।

'श्री' 'रमा' टीकासहितम् ।

अस्मिन् संस्करणे कथासारः, श्लोकानुक्रमणी, छन्दोलक्षणानि, प्रस्तुत-नाटके प्रसङ्गागतानां नान्दी-नेपथ्य-प्रस्तावना-प्रवेशक-स्वगत-प्रकाश अपवारित-विष्कम्भक-सूत्रधार-काञ्चुकीय-विदूषकादीनां नाट्य-शास्त्रीयपारिभाषिकशब्दानां हिन्दीभाषानुवादसहितानि तत्तल्लक्षणानि प्रस्तुतनाटकीयपात्रपरिचय- प्रस्तुतनाटकाऽऽधारभूत- बृहत्कथामञ्जरी-कथासरित्सागरान्तर्गत-वत्सराजकथाभागश्च संगृहीतः । टीकेयं मध्यम-परीक्षादिसुविद्यार्थिजनमनस्तोषिणी । मूल्यम् २।)

[२]

अभिज्ञानशाकुन्तलम् ।

'लक्ष्मी' टीकाविराजितम् ।

महाकविकालिदासविरचितस्यास्य ग्रन्थरत्नस्य विषये प्रशंसनं नाम दीपदर्शनमिव भास्वतः । अस्य टीकाकारोऽपि संस्कृतसाहित्यव्योम्नि राकाशशीव प्रकाशते । अनया वैदुष्यपूर्णया कविहृद्गतभावप्रकाशन-चतुरया सरलया टीकया शास्त्रिपरीक्षार्थिनोपूर्णां महानु[illegible] सम्भवितेत्यनुभव एव भवितुं तेषां साक्षी । मूल्यम् ३॥) रजतजुबिली संस्करणस्य, ३) साधारणसंस्करणस्य ।

पुस्तकप्राप्तिस्थानम्—

मास्टर खेलाड़ीलाल ऐण्ड सन्स,

संस्कृतपुस्तकविक्रेतारः,

कचौड़ीगली, बनारस सिटी ।

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi